No. 99.

टीका

॥श्रीगणेशाय नमः॥ जयति गिरितनूजाऽऽलापपीयूषधाराहरहृदयपयोधिस्फूर्जदिंदु
हृदयश्रीः। त्रिभुवनमहनीयब्रह्मविद्यैकमूर्तिः सुरनरमुनिवंद्यः सूर्यमानो गणेशः॥१॥
अस्तीय सीमन्तन्याङ्ग गंभीरा भास्करो कृपः सम्यक् कृग्भाव कृर्मन्तो वक्तुं महपद्यपि न
१ हेमनः॥२॥ तथाप्याम्नायतः किंचित्किंचिच्छास्त्रांतरात्पुनः ज्ञात्वा लीलावतीपाठीं विव
णोमि समासतः॥३॥ श्रीभास्कराचार्यः शिष्टसमाचारपरिपालनाय नमस्कारप्रक
रण समुद्भूतधर्म द्वारेण प्रत्यूहापोहाय श्लोकस्य पूर्वार्द्धेनेष्टदेवतां गणेशं संस्तु
वन्नपरार्द्धेन कार्यं विवक्षुराह॥ ॥प्रीतिं भक्तजनस्य यो जनयते विघ्नं विनिघ्नन्
स्मृतस्तं वृंदारकवृंदवंदितपदं नत्वा मतंगाननं॥ पाटीं सद्गणितस्य वच्मि चतु
रप्रीतिप्रदां प्रस्फुटां संक्षिप्ताक्षरकोमलामलपदैर्लालित्यलीलावतीं॥४॥ यः परमे
श्वरः स्मृतो मनसा संध्यातः सन् भक्तजनस्य प्रणतलोकस्य विघ्नं प्रारब्धकार्यप्रतिबं
धकमंतरायं॥ जातावेकवचनं बहूनपि तान् विघ्नान् विनिघ्नन् समस्तानवदलयन् ॥१॥
यानितरामतिशयेनापुनर्भवं घ्नन् स्फुटयन् प्रीतिमानंदं जनयते॥ सपाद्यत

मस्य स्यात्पुक्तित्वाद्भक्तजनस्यैवमतं गाननं मतं गो हस्ती तस्याननमिवाननं यस्य सः म
तंगाननः तं। गजवक्त्रं गणाधिपं॥ वृंदारकवृंदवंदितपदं॥ वृंदारका देवतास्तेषां वृंदं स
मूहस्तेन विघ्नविनाशनामाशंसता संतोषितेन वंदितौ प्रणतौ स्तुतौ वा पादौ यस्य
स वृंदारकवृंदवंदितपदः तं। वृंदारकवृंदवंदितपदं। नत्वा तं प्रतिप्रह्वीभूय। सद्गणि
तस्य शोभनगणितस्य प्रबंधस्य संकलितव्यवकलितादेः पाटीं पद्धतिं प्रबंधरू
पां। चतुरप्रीतिप्रदां॥ चतुरा गणितानेकग्रंथकुशलास्तेषां प्रीतिस्तदन्तर्व्यवेदग्ध्याश्र
वणेन मनस्तुष्टिस्तां प्रददातीति सा चतुरप्रीतिप्रदा तां चतुरप्रीतिप्रदां प्रस्फुटां॥ स्फुट
कां। केन कृत्वा। संक्षिप्ताक्षरकोमलामलपदैः कृत्वा॥ संक्षिप्ताक्षराणि परिमितवर्णा
नि कोमलानि श्रुतिसुखानि। अमलानि। निरवद्यानि यानि पदानि स्वाद्यंतानि तैः
संक्षिप्ताक्षरकोमलामलपदैः इयं ताकविनास्वप्रौढिरुक्ता॥ एतत्प्रबंधोत्तरेषु
सत्स्वपि बंधस्यास्य निर्माणसाफल्यं लालित्यलीलावती॥ ललितस्य मनोह

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

रस भावः लालित्यं लालित्यस्य मनोहरत्वस्य या लीलावती। आनुपूर्व्यपदग्रथनचातु
॥२१॥ र्यबहुर्थप्रकाशनत्वलक्षणं तत्त्वं विद्यते यस्यां सा लालित्यलीलावती तां स्त्रीपक्षे ला
लित्यस्य सौंदर्यस्य लीला हास्यादिरसवत्त्वातिशययुक्तां तां लालित्यलीलावतीम् एवं च बि
नास्य ग्रंथस्य नामापि सूचितं अथवा पाठिपक्षे लालित्यं शब्दार्थसौकुमार्यं स्त्रीपक्षे
लालित्यं मसृणांगन्यासवत्त्वं॥ मसृणांगविन्यासो ललितमिति वचनात्॥ अस्य ली
लावतीति कवेः काव्यनप्रियया तमात दुहितुरुद्देशेन ग्रंथकर्तृत्वमपि सूचितं तेन आय
ः प्रत्युदाहरणं लीलावति संमेत्रणा दर्शितं॥ बच्ची बनाये॥ भास्करकविरात्मानं निर्दि
शती गणपतिं नत्वा लीलावति नाम्नीं पाटीं अहं कथयामीति समाशयार्थ इति वर्त्मा
र्थः॥ वराटकानां दशकद्वयं यत्सा काकिणी ताश्च पणश्चतस्रः ते षोडश द्रम्म इ ॥२॥
हावगम्यो द्रम्मैस्तथा षोडशभिश्च निष्कः॥ यत् वराटकानां कपर्दिकानां दशकद्वयं
सा काकिणी स्यात्॥ दशकस्य द्वयं दशकद्वयं। कपर्दिकानां दशकद्वयं सा काकिणीत्य
र्थः॥ ताश्चतस्रः पणः॥ अशीतिकाकिण्यः पणसंज्ञो भवति॥ कपर्दिकानां अशीत्या एकः पणो

भवतीत्यर्थः॥ इत्यत्र ते षोडश पणाः द्रम्मो द्रम्मसंज्ञो वगम्यो ज्ञेय इत्यर्थः॥ तथा तेन प्रका
रेण षोडशभिर्द्रम्मैर्निष्को ज्ञेयः॥ निष्क इति संज्ञा देशभाषा॥ अथ तोल्यमानमाह॥ तुल्या यवाभ्यां
कथितात्र गुंजा वल्लस्त्रिगुंजो धरणं च तेऽष्टौ। गद्याणकस्तद्द्वयमिन्द्रतुल्यैर्वल्लैस्तथैको
घटकः प्रदिष्टः॥ अत्र पाद्यायवाभ्यां द्वाभ्यां तुल्या समाना गुंजा च कथिता मध्यमयव
द्वयतोल्यप्रमाणा एका गुंजेत्यर्थः सा लोके रत्तिरुच्यते॥ वल्लः त्रिगुंजः कथितः त्रिस्रो गुं
जा यत्र सः त्रिगुंजः॥ तिसृभिर्गुंजाभिरेको वल्ल इत्यर्थः॥ ते अष्टौ वल्ला धरणमिति
संज्ञा॥ अष्ट गद्याणकमित्यर्थः तत् द्वयं धरणद्वयं गद्याणक प्रदिष्टः कथितः षोडश
भिर्वल्लैर्गद्याणक इत्यर्थः॥ इन्द्रतुल्यैर्वल्लैश्चतुर्दशभिर्वल्लैरेको घटकः प्रदिष्टः कथि
तः घटक इति देशभाषा॥ अथ मागधदेशजं तोल्यमानमाह॥ दशार्द्धगुंजं प्रवदंति मा
षं माषाह्वयैः षोडशभिश्च कर्षं॥ कर्षैश्चतुर्भिश्च पलं तुलाज्ञाः कर्षं सुवर्णस्य सुवर्णसंज्ञं॥
तुलां तोल्यं जानंतीति तुलाज्ञाः॥ माषं प्रवदंतीति किं तत् दशार्द्धगुंजं दशार्द्धं पंच संख्याः॥ गुं
जा यत्र स दशार्द्धगुंजस्तं। दशार्द्धगुंजं माषं। षोडशभिर्माषाह्वयैः माषाभिधैः कर्षं वदंति
। चतुर्भिः कर्षैः पलं कथयंति। सुवर्णस्य हेम्नः कर्षः सुवर्णसंज्ञो भवति। हेम्नः कर्षस्य सुवर्णमि

त्यपरं नाम। नन्तु रजतादेर्वस्तुतः कर्षस्य सुवर्णसंज्ञा॥ अथ क्षेत्रार्थं हस्तप्रमाणादिमानमाह॥ यवो
दरैरंगुलमष्टसंख्यैर्हस्तोंगुलैः षड्गुणितैश्चतुर्भिः॥ हस्तैश्चतुर्भिर्भवतीह दंडः॥ क्रोशः सहस्र
द्वितयेन तेषां॥ यवोदरैर्यवमध्यैरष्टसंख्यैरष्टप्रमाणैरंगुलं भवति षड्गुणितैः षड्भिराहतै
॥२॥ श्चतुर्भिरंगुलैर्हस्तो भवति॥ अंगुलचतुर्विंशत्या एको हस्त इत्यर्थः॥ इह ग्रंथे चतुर्भिर्हस्तैर्दंडो
भवति। तेषां दंडानां सहस्रद्वितयेन। सहस्रस्य द्वितयं सहस्रद्वितयं तेन क्रोशो भवति। हस्तसह
स्राष्टकेन क्रोश इत्यर्थः॥ स्याद्योजनं क्रोशचतुष्टयेन तथा कराणां दशकेन वंशः॥ निवर्तनं
विंशतिवंशसंख्यैः क्षेत्रं चतुर्भिश्च भुजैर्निबद्धं॥ क्रोशचतुष्टयेन क्रोशानां चतुष्टयं क्रोशचतु
ष्टयं तेन क्रोशचतुष्टयेन योजनं स्यात् एकं योजनं भवति। तथा तेन प्रकारेण कराणां दश
केन वंशः स्यात्। दशभिर्हस्तैरेको वंशः। निवर्तनं स्यात्॥ किं विंशतिवंशसंख्यं विंशति
र्वंशप्रमाणं निवर्तनमित्यर्थः॥ चतुर्भिर्भुजैः क्षेत्रं निबद्धं॥ हस्तादिप्रमाणं तैश्चतुर्भि
र्भुजैः पक्षैः क्षेत्रं निबद्धं नियमितं॥ अथ घनहस्तमानमाह॥ हस्तोन्मितैर्विस्तृतिदैर्घ्यपिंडै
र्यद्द्वादशास्रं घनहस्तसंज्ञं धान्यादिके यद्घनहस्तमानं शास्त्रोदिता मागधखारिका सा॥ ॥३॥
यत्र द्वादशास्रं द्वादशकोणं खातं कष्टपाषाणादिकं तद्घनहस्तसंज्ञेयं॥ कैः कृत्वा॥ विस्तृति

दैर्घ्यपिंडैः विस्तृतिश्च दैर्घ्यं च पिंडश्च। विस्तृतिदैर्घ्यपिंडास्तैर्विस्तृतिदैर्घ्यपिंडैः॥ विस्तृतिर्विस्ता
रः दैर्घ्यमायामः पिंडः स्थौल्यं किंविशिष्टैर्हस्तोन्मितैः हस्तप्रमाणैः विस्तारायामस्थौल्यैरेको घ
नहस्त इत्यर्थः यत् धान्यादिके घनहस्तमाने सा मागधखारिका मगधदेशप्रमाणेन खा
रिका॥ शास्त्रोदिता गणितग्रंथोक्तप्रमाणेत्यर्थः॥ अत्र देशे घनहस्ते यावन्मानं अस्य मानमस्य व
स्थितिस्तत्र तावन्मानस्य निर्देशः॥ अथ धान्यमेयप्रमाणमाह॥ द्रोणस्तु खार्याः खलु षोड
शांशः स्यादाढको द्रोणचतुर्थभागः प्रस्थश्चतुर्थांश इहाढकस्य प्रस्थांघ्रिराद्यैः कुडवः प्र
दिष्टः खलु निश्चयेन खार्याः षोडशोंशः षोडशो भागो द्रोणः स्यात्॥ षोडशभिर्द्रोणैरेका
खारीत्यर्थः॥ द्रोणस्य चतुर्थभागः द्रोणस्य चतुर्थांशः आढकः स्यात्। इह ग्रंथे आढकस्य च
तुर्थांशः चतुर्थभागः प्रस्थः प्रस्थसंज्ञकः प्रस्थांघ्रिः प्रस्थस्य चतुर्थो भागः आद्यैरा
चार्यैः कुडवः प्रदिष्टः कथितः शेषा अवशिष्टाः कालादिपरिभाषास्तु व्याहृत्या लोक
प्रसिद्धा ज्ञेया। अवगंतव्याः अत्रेमा परिभाषा॥ पुनरपि भास्कराचार्यः ग्रंथकारः संभावितो
त्पत्तिविघ्नसमूहनाशाय आद्यंताचरणीयं इष्टदेवतां गणेशं प्रति नमस्कारार्थं श्लोकमाह॥ श्री
लोकजलजलजोलनकोलमायालविलाशिने॥ गणेशाय नमो नीलकमलामलकांतये

गणेशाय गणपतये नमः। कथं भूताय। लीलागललुलल्लोलकालव्यालविलासि
ने। लीलायां गले कंठे लुलन् लुठन्। लोलश्चंचलः कालः कृष्णो व्यालो दुष्टसर्पस्तत्र विला
सो यस्यास्ति स लीलागललुलल्लोलकालव्यालविलासी तस्मै लीलागललुलल्लोल
॥४॥ कालव्यालविलासिने। पुनः। किं विशिष्टाय। नीलकमलामलकांतये। नीलं कृष्णं कमलं तत्
तद्वदमला निर्मला कांतिर्यस्य॥ [illegible] तस्मै। अथ संख्यास्थाननामान्याह। एकदशशत
सहस्रायुतलक्षप्रयुतकोटयः क्रमशः॥ अर्बुदमब्जं खर्वनिखर्वमहापद्मशंकवस्त
स्मात्। जलधिश्चांत्यं मध्यं परार्धमिति दशगुणोत्तराः संज्ञाः॥ संज्ञाः संख्यास्थानानां व्यवहा
रार्थं कृताः पूर्वैः। पूर्वैश्चार्यैः संख्यायाः परिमितेः स्थानानां [illegible] दशस्था
नानां संज्ञाः अभिधाः कृताः। चक्रिरे। किमर्थं व्यवहारार्थं व्यवहृतये। कथं दश
गुणोत्तरं। क्रमशोऽनुक्रमेण यथा एकं दशगुणं दश। दशदशगुणाः। नि उत्तराणि परा
णि येषु तद्दशगुणोत्तरं। क्रमशोऽनुक्रमेण। यथा एकं दशगुणं दश। दश दशगुणाः श ॥५॥
तं। शतं दशगुणं सहस्रं। सहस्रं दशगुणं मयुतं। अयुतं दशगुणं लक्षं। लक्षं दशगुणं
प्रयुतं। प्रयुतं दशगुणं कोटिः। एवमर्बुदादीनामपि यथासंख्यं दशगुणोत्तरः।

संज्ञेयाः॥ रमाः सर्वा अपि संज्ञा पौराणिक्यो निरन्वयाः प्रसिद्धा ज्ञेयाः॥ अथ सं
कलितव्यवकलितयोः करणसूत्रं वृत्तार्धं॥ अथ शब्द आनंतर्ये। संकलितं च व्यव
कलितं च संकलितव्यवकलिते तयोः संकलितव्यवकलितयोः करणसूत्रं॥
क्रियतेऽनेनेति करणं गणितकर्म। तत्र सूत्रं करणसूत्रं। प्रक्रियासूचकं। कार्यः
क्रमादुत्क्रमतो वांकयोगो यथास्थानकमंतरं वा। संकलिते यथा स्थानकं। स्थानमा
मनतिक्रमेण। अंकयोगः कार्यः। अंकानां योगः। एकत्र मेलनं। वा समुच्चये। व्यव
कलितेंतरं कार्यं कोर्थः॥ आयराशेर्मध्यात् व्ययांकयोगस्यांतरं पातनं कार्यमि
त्यर्थः॥ तत्रोदाहरणमाह॥ अये बाले लीलावति मति। मतिं ब्रूहि सहितान् द्विपंच
द्वात्रिंशत्त्रिनवतिशताष्टादशदशशतोपेतानेतानयुतवियुतांश्चापि वद मे यदि
व्यक्तेयुक्तिव्यवकलनमार्गेसि कुशला॥ अये इति कोमलप्रश्ने। बाले सामंत्र
णेन। वयो यौवनाभिमुखीमवस्थां दर्शयति। ऊनषोडशवार्षिकी बालेति वच
नात्। लीलावति त्वामंत्रणेन तस्या विवदसो [illegible] कटयति। मतिमत
सामंत्रणेनाल्पीयस्यापि वयसि बुद्धिप्रागल्भ्येन तस्या गरिमाणं दर्शयति

हेबुधिमुक्ते।द्विपंचद्वात्रिंशत्त्रिनवतिशताष्टादशादशा।एतान्।अंकान्।द्वीपंचद्वात्रिं
शत्त्रिनवतिशताष्टादशादश।सहितान्संकलितान्एकत्रमेलितान्।चसमुच्चये।
॥५॥ एतान्द्वादीन्।शतोपेतान्शतसंयुक्तान्मेमम।अयुतवियुतान्।सहस्रदशका
त्पातीतान्वदकथय।यदिव्यक्तेपाटीरूपेगणिते युक्तिव्यवकलनमार्गः।त
स्मिन्युक्तिव्यवकलनमार्गे।कुशलानिपुणःअसी भवतिन्यासः।२।५।३२।१९३।
१८।१११अंकयोजनाज्जातं२५०अथव्यवकलितेन्यासः।२।५।३२।१९३।१८।१०।१००
आयराशीरयुतं१००००व्ययांकोयोजितेजातं३५०।अयुतात्पातितेजाते९६
५० इतिसंकलितव्यवकलिते।गुणनेकरणसूत्रं सार्धवृत्तद्वयं गु[illegible]रूपतेतत्
गुणने।तत्रकरणसूत्रं।गुण्यांत्यमंकंगुणकेनहन्यादुत्सारितेनैवमुपांत्यमादि
न्।गुण्यस्त्वधोधोगुणखंडतुल्यस्तैःखंडकैःसंगुणितोयुतोवा।भक्तोगुणःशु
ध्यतियेनतेनलब्ध्याचगुण्योगुणितःफलंवाद्विधाभवेद्रूपविभागएवंस्था
नैःपृथग्वागुणितःसमेतः।इष्टोनयुक्तेनगुणेननिघ्नो।भीष्टघ्नगुण्यान्वितव ॥५॥
र्जितोवागुण्यस्यअंत्यांकोगुण्यांत्यस्तंगुण्यांत्यगुण्यराशेरंत्यंअंकंगुणकेनगुणरा

शिनाहन्यात्गुणयेत्।उत्सारितेन।चसमुच्चये।एवंअमुनाप्रकारेणउपांत्यमादिन्।कि
विशिष्टेनगुणकेन।उत्सारितेन।द्वितीयांकोपरिस्थापितेन।गुणनंनेतरंयावदंकं
विहन्यतेतावत्पर्यंतंद्वितीयादिअंकोपरिस्थापनमित्यर्थः।एवंगुणकारःसिध्यति॥
गुणरूपविभागोयथा।वाअथवागुणराशिर्द्वास्यां त्रिभिश्चतुर्भिर्वाखंडैःखंडनीयः
।ततोगुण्यो गुणनीयांको गुण~~[illegible]~~खंडतुल्ये गुणस्यखंडाद्व्यादिनि
तत्तुल्यो गुणखंडतुल्यः।अधोधोविन्यस्तः तैःगुणखंडकैःसंगुणितःसन्युतो
मीलितःकार्यः।एवंगुणकारःसिध्यति।अथवा।गुणःगुणराशिःयेनकेनचि
केनभक्तेहृतःसन्शुध्यतिनिरग्रकोनिरवशेषोभवतितेनांकेनलब्ध्याचगु
णराशौभंजनात्यालब्धिस्तया।लब्ध्याच।गुण्योगुणनीयोंकोहतोगुणितः।फ
लं।गुणकारफलंभवति।एवंगुणकारःसिध्यति।एवंअमुनाप्रकारेणरूपवि
भागोरूपाणांविभागोरूपविभागःद्विधाद्विप्रकारोभवेत्।जायते।स्थानवि
भागोयथा।स्थानानिएकदशशतादीनि।तैःस्थानैःपृथकपृथकगुण्योगुणनी
योगुणितोहतोयथास्थानंसमेतोयोजितःकार्यः।एवंगुणकारःसिध्यति।अथ

भवा।तो।गुणेन। इष्टेन युक्तेन। इष्टेनोनश्च युक्तश्च इष्टोनयुक्तस्तेन इष्टोनयुक्तेन। गुणेनागु
णनीयो निघ्नो निहन्यत इति निघ्नो गुणित इत्यर्थः। अभीष्टघ्नगुणोऽन्वितवर्जित
ः। अभीष्ट इष्टो यो सो अंकस्तेन निहन्यत इति निघ्नो गुणितो गुणस्तेनान्वितो यु
॥६॥ क्तो विवर्जितः ऊनः। इतिकोर्थः। यत्र इष्टेन युक्तो गुणराशिर्भवति॥ तत्राभीष्ट
घ्नगुणांके न ऊनो हीनः कार्यः। यत्र इष्टेन गुणराशिरूनो भवति तत्राभीष्टघ्नगु
णांके न युतः कार्य इत्यर्थः। अत्रोद्देशकः॥ बाले बालकुरंगलोलनयने लीलाव
ति प्रोच्यतां पंच त्र्यंकमिता दिवाकरगुणा अंकाः कति स्युर्यदि। रूपस्थानविभा
गखंडगुणने कल्पासि कल्याणि निश्छिन्नास्तेन गुणेन ते पि च पुनर्जाताः कति स्यु
र्यदि। बाले त्यामंत्रणं हरव वत् हे बाले कुरंगलोलनयने। बालो यो सो कुरंगो मृग
स्तद्वल्लोले चपले नयने यस्याः सा तस्याः संबोधने हे लीलावति प्रोच्यतां कथ्यतां
। पंचत्र्यंकमिता अंकाः। पंच च त्रयश्च पंच त्र्यंकाः। पंचत्र्यंकैः परिमिताः ~~[struck]~~ ॥५॥
पंचत्र्यंकमिताः॥ दिवाकरे गुणा दिवाकरः सूर्यस्तेनोपलक्षिता द्वादश ते गुणि
ताः कति स्युः कियंतो भवंति। यदि रूपस्थानविभागखंडगुणने। रूपाणि च स्था

नानि च रूपस्थानानि। तेषां विभागा रूपस्थानविभागाः। तेषां खंडानि रूपस्थानविभागखं
डानि तेषां। ~~[struck]~~ तेषां गुणने रूपस्थानविभागखंडगुणने। हास्मिन् कल्यासि
सज्जासि निरामया वासि। कल्पो सज्ज निरामययोरिति विश्वप्रकाशात्। दक्षा भवति। अपभा
गहारस्तोह हरणे॥ कल्याणि निपुणा मुक्ते। च स्तु मुच्यमे। ते गुणना ज्ञाता अंकाः॥ तेन
द्वादशलक्षणेन गुणेन छिन्ना भक्ताः कति स्युः कियंतो भवंति वदन्यासः। १३५ गु
णने १२ गुणं पातसमंके गुणके नहन्यादिति कृते १२ ३५ अंत्येन एकेन गुणिते जाते १२ ३५
उत्सारिते जाते १२ ३५ त्रीके गुणिते जाते १२ ३६ ५ पुनरुत्सारिते जाते १२ ३६ ५ पंचके गुणि
ते ते १२ ६० विनष्टं येन गुणितं तेन द्वादशी ... गताः। इति कृते अंकयोज्जना जाते १६२०
अत्र ... यत्र चतुरस्रक्षेत्रे वासना। यत्र द्वादशहस्तमिता कोटिः पंचत्रिंशत् भुते
भुजस्तत्र फलं किमिति। न्यासः। भुजः १३५ कोटिः १२ घातफलं १६२० अथवा गुणरूप
विभागे कृते खंडे। ८।४ अनयोः प्रथक् गुणिते अथवा कृगुणेन १३५ १३५ कृते जाते १०८
५४० यो।जिते जाते १६२० अथवा गुणक स्त्रिभिर्भक्तः ३ १२ लब्ध ४ गुणे त्रिभिर्गुणि
ते जाते ३ १३५ ४०५ लब्ध्या च ४०५ गुणिते जाते तदेव १६२० अथवा स्थानविभागे कृते
खंडे १।२ आभ्यां प्रथक् गुणिते गुणेन गुणिते जातं खंडे १३५०।२७० यथास्थानं योजिते

जातं तदेव १५२० अथवा इष्टे २ गुणिते २ युते १५ अनेन गुणे गुणिते २२५ जातं २०२५ इष्टेन गुणे
हृते ३ जातं ७०५ अनेन पूर्वेकेन हीने कृते जातं तदेव १५२० अथवा अनेनापि इष्टेन गुणके
कृते जातं २ अनेन गुणे गुणिते २२५ जातं १२२५ इष्टेन २ गुणे हृते ३ जातं ७०५ अंकको जना
॥७॥ जातं तदेव १५२० अथ गुणकारविधिस्तोराशिकान्तर्भूतोकेय: तद्यथा पंचत्रि कं नस्तपलं पंचत्रिंश
दधिकं शतं प्राप्यते तदा द्वादशानि स्तपः किमिति न्यास: १।१२।१३५ इच्छाहते अदिहृते फलं तदे
व १५२० इति गुणकार: भागहारकरणसूत्रं ॥ भागो ह्रियते ऽनेनेति भागहारस्तत्र सूत्रे
। भाज्याद्धर: शुध्यति यद्गुण: स्यात् स्यात् फलं तत् खलु भागहारे। समेन केनाप्यपवर्त्य हारभा
ज्यौ भजेद्वा सति संभवे तु। हरतीति हर: भाज्यते सो भाज्य: अंत्यात् भाज्यात् भाज्यांकात् हर:
छेदो यद्गुण: यो गुणो यस्य स यद्गुण: सन् शुध्यति निःशेषो भाग: संभवति खलु निश्चयार्थे भाग
हारे तत्फलं स्यात् भवति। इति कोर्थ: अंत्याद् भाज्यादध: स्थितेन हारेण एकद्विआदिगुणेन भागो यथा
संभवति। भागहारे तदेकद्व्यादिकं फलं लब्धिफलं भवतीत्यर्थ:। अथवा संभवे सति घटनायां
सत्यां हारभाज्यौ छेदे द्वे इच्छ राशि समेन तुल्येन केनाप्यंकेनापवर्त्य छित्वा भजेत् भागहारे
तत्फलं तदेव गणितज्ञाप नार्थमिदं॥ अत्र पूर्वेराहरणे गुणितांकानां स्वगुणच्छेदानां न्यास: ॥७॥
१५२० अत्रे कगुणेन हरेण भाग: शुध्यति १५२० भक्ते जातं ७२० अत्रेकलब्धि १ छेद: ३ आ
१२ रिते जातं यथा १२ अचात्रिगुणेन हरे १२ ण भाग: शुध्यति भक्ते जातं ६० लब्धि: ३ छेद:

उत्सारिते अत्र पंचगुणेन हारेण भागशुध्यति १२ भक्ते भाज्य: शुद्ध: १२ अत्र पंचको लब्धि: ५ विनष्टं येन न
ष्टं भाज्ये गता: लब्धय: एकत्र कृता १३५ अथ भाज्यहारौ त्रिभिरपवर्त्तितौ जातौ ५०७ भक्ते फलं
तदेव १३५ चतुर्भिरपवर्त्तितौ १५ भक्ते फलं तदेव। अत्राप्यय तत्र चतुरस्रे कल्पे पं चत्रिंशाद्धतं
गुलो विंशत्यधिकषोडशशत तानि फलं। तत्र कको टिरिति। अत्र भुजं भागहारं राशिं कृत्वा
जा कोटि: १२ अत्र त्रिराशिकं यथा॥ द्वादशभिर्मे विंशत्यधिकषोडशतान्याप्नो। एकेन किं
ते तदा स्तपेन किमिति। न्यास: १२।१६२०।१ इच्छाहते अदिहृतं लब्धं फलं १३५ इति भागहार:॥ वर्ग
करणसूत्रं वृत्तद्वयं। समद्विघात: कृतिरुच्यते ऽथ स्थाप्यो ऽन्त्यवर्गो द्विगुणान्त्यनिघ्ना: स्वस्वोपरि
ष्टाच्च तथापरे ऽकास्त्यक्त्वान्त्यमुत्सार्य पुन: श्च राशिं। खंडद्वयं स्या निहति: द्विनिघ्नी तत्खंडवर्गै
क्यमुता कृतिर्वा। इष्टोनयुग्राशिवध: कृत: स्यादिष्टस्य वर्गेण समन्वितो वा॥ समौ तु ज्यौ द्वौ यौ रा
शी तयोर्घातो ऽनन समांघघत:॥ कृतिरुच्यते। वर्ग: कथ्यते। अथ अंत्यस्य वर्गो ऽन्त्यवर्ग:। स्थाप्यो
निवेशनीय:। च सलुद्वये। अपरे ऽन्ये ऽंका द्विगुणेन्त्यनिघ्ना: सर्वे स्वस्वोपरिष्टाद्द्विगुणेन यो सौ
न्त्यस्तेन निघ्नाहता: स्थाप्या:। न जलिजो परिष्टादित्यर्थ:। स्वस्वस्थानमतिक्रम्य। तत स्तदंतं
त्यस्योपरि त्यक्त्वा शेषं राशि उत्सार्य सक्रमय्य। पुन: स्थाप्यो ऽन्त्यवर्गोद्यादिना वत्क्रियातया

जातं तदेव १५२० अथवा इष्टे ३ गुणिते २ गुणिते १५ अनेन गुणेन गुणिते ४५ जातं २०२५ इष्टेन गुणेन
हृते ३ जातं ६७५ अनेन पूर्वं केऽहीने कृते जातं तदेव १५२० अथवा अनेनापि इष्टेन गुणके
कृते कृते जातं २ अनेन गुणेन गुणिते २७५ जातं १२१५ इष्टेन ३ गुणेन हृते ३ जातं ४०५ अंकेनो जना
॥७॥ जातं तदेव १५२० अथ गुणकारविधिस्तो राशिकात्मकं क्रियः तद्यथा पद्ये केन रूपेण पंचत्रिंश
दधिकं शतं प्राप्यते तदा द्वादशभिः रूपैः किमिति न्यासः १।१२।१३५ इच्छाहते अदिद्रुतफलं तदे
व १५२० इति गुणकारः भागहारकरणसूत्रं ॥ भागोद्धृते यत्नेनेति भागहारस्तत्र सूत्रे
। भाज्याद्धरः शुध्यति यद्गुणः स्यादंत्यात्फलं तत्खलु भागहारे । समेन केनाप्यपवर्त्य हारभा
ज्यो भजेद्वा सति संभवे तु । हरतीति हरः भाज्यते सो भाज्यः अंत्यात् भाज्यात् भाज्यांकात् हरः
छेदः यद्गुणः यो गुणो यस्य स यद्गुणः सन् शुध्यति निःशेषो भागः संभवति खलु निश्चयार्थे भाग
हारे तत्फलं स्याद्भवति । इति कोर्थः अंत्याद्भाज्यादधःस्थितेन हारेण एकद्व्यादिगुणेन भागो यथा
संभवति । भागहारे तदेकद्व्यादिकं फलं लब्धिफलं भवतीत्यर्थः । अथवा संभवे सति घटनायां
सत्यां हारभाज्यौ छेद्यच्छेदौ राशिसमेन तुल्येन केनाप्यंकेनापवर्त्य छित्वा भजेत् भागहारे
तत्फलं तदेव गणितज्ञापनार्थमिदं ॥ अत्र पूर्वोदाहरणे गुणितांकानां स्वगुणच्छेदानां न्यासः ॥७॥
१५२० अत्रे कगुणेन हरेण भागः शुध्यति १५२० भक्ते जातं ७२० अत्रे कलब्धिः छेदः उत्सा
१२ रिते जातं यथा १२ अथवात्रिगुणेन हरे १२ भागः शुध्यति भक्ते जातं ६० लब्धिः ३ छेदः

उत्सारिते अत्र पंचगुणेन हारेण भागः शुध्यति ६२ भक्ते भाज्यः शुद्धः १२ अत्र पंचकोलब्धिः ५ विनष्टे येन ना
कं दाहरागताः लब्धयः एकत्र कृता १३५ अथ भाज्यहारौ त्रिभिरपवर्तितौ जातौ ५४० भक्ते फलं
तदेव । १३५ चतुर्भिरपवर्तितौ ४५ भक्ते फलं तदेव । अत्राप्ययत्न चतुरस्रे कल्पे ५ चत्रिंशाछत
भुजौ विंशत्यधिकषोडशशत तानि फलं । तत्र कः कोटिरिति । अत्र भुजं भागहारं राशिं कृत्वा
जा कोटिः १२ अत्र त्रैराशिकं यथा ॥ द्वादशभिः रूपैर्विंशत्यधिकषोडशशतानि प्राप्तानि लभ्य
ते तदा रूपेण किमिति न्यासः ॥ १२।१६२०।१ इच्छाहते अदिहृतं लब्धं फलं १३५ इति भागहारः ॥ वर्ग
करणसूत्रं वृत्तद्वयं ॥ समद्विघातः कृतिरुच्यते यस्यापि स्यादंत्यवर्गो द्विगुणांत्यनिघ्नाः स्वस्वोपरि
ष्टाच्च तथापरेंकास्त्यक्त्वान्त्यमुत्सार्य पुनश्च राशिं । खंडद्वयं स्याभिहतिर्द्विनिघ्नी तत्खंडवर्गै
क्यसमुता कृतिर्वा इष्टोनयुग्राशिवधः कृतस्यादिष्टस्य वर्गेण समन्वितो वा ॥ समौ तुल्यौ द्वौ यौ रा
शी तयोर्घातो हननं समद्विघातः ॥ कृतिरुच्यते । वर्गः कथ्यते । अथ अंत्यस्य वर्गो त्यवर्गः । स्थाप्यो
नि वेशनीयः । चकारः समुच्चये । अपरे अंका द्विगुणेन त्यनिघ्नाः सर्वे स्वस्वोपरिष्टात् द्विगुणेन यासौ
त्यस्तेन निघ्ना हताः स्थाप्याः । न तु नि जोपरिष्टादित्यर्थः । स्वस्वस्थानमतिक्रम्य । ततस्तदंतं
त्यक्त्वा परित्यज्य शेषं राशिमुत्सार्य संक्रमय्य । पुनः स्थाप्यो त्यवर्गद्विगुणादिना वत्कुर्यात्तया

यावद्दंकानां समाप्तिः स्यात्। एवं वर्गः सिध्यति। प्रकारांतरमाह॥ खंडाभ्यां वेत्यादि। खंडद्वयं तु
॥ ८ ॥ स्य खंडद्वयस्य। अभिहतिः परस्परहननेन। कृतिर्भवति। किंविशिष्टा द्विनिघ्नी। द्वाभ्यां नि
हता। पुनः किंविशिष्टा। तत्खंडवर्गैक्ययुता तयोः खंडयोर्वर्गौ तयोर्वर्गयोरेक्यं। तत्खंड
वर्गैक्यं तेन युता युक्ता तत्खंडवर्गैक्ययुता कृतिर्वर्गो भवति॥ अथ प्रकारांतरेणाह। इष्टो
नेति॥ इष्टेनाभीष्टेन अंकेन ऊनश्च युक्तश्च। इष्टोनयुक्तौ। तौ यौ राशी इष्टोनयुग्राशी
तयोर्वधः परस्परहननं। इष्टोनयुग्राशिवधः। तस्य इष्टवर्गेण समन्वितो युक्तः सन् वर्गो
भवति कोर्थः॥ को राशिरिष्टेन कल्पितेन केनाप्यंकेन ऊनो हीनः कार्यः स एव राशिरप
रस्मिन् स्थाने तेनैवेष्टेन युक्तः सहितः कार्यः॥ तयोर्वधः परस्परघातः तस्मिन्निष्टवर्गेण यु
तस्तेन वर्गो भवति यदा नवको राशिः रधिके द्वे कल्पयति तदा करणगतिकल्पेष्टवर्गात
शीघ्रं। अवाशिष्ट वर्गः सिध्यति। अत्रोद्देशकः॥ सखे नवानां च चतुर्दशानां ब्रूहि त्रिहीन
स्य शतत्रयस्य पंचोत्तरस्याप्ययुतस्य वर्गं जानासि चेद्वर्गविधानमार्गं। हे सखे
त्वं नवानां वर्गं ब्रूहि। वद। च समुच्चये। चतुर्दशानां वर्गं वद। त्रिहीनस्य शतत्रयस्य स ॥ ८ ॥
तनवत्याधिकशतद्वयस्येत्यर्थः पंचोत्तरस्य पंचाधिकस्य अयुतस्य सहस्रदशकस्य

चेद्यदि वर्गविधानमार्गं वर्गकरणसरणिं जानासि वेत्सि इति न्यासः॥ ९।१४।२९७।१००५ नवानां य
था॥ समद्विघात इति कृते जातं ८१ समद्विघात इति यत्सूत्रं तत्तेराशि कोष्ठकं॥ समचतुरस्रक्षे
त्रात्मकं च। क्षेत्रे राशिके यथा यदि रूपेण वपा त्रापि प्राप्यते तदा नवभिः किमिति ९।१।९ फलं ८१ क्षे
त्रकल्पना यथा यत्र नवहस्तमितौ कोटिभुजौ। तत्र फलं किमिति। कोटि ९ भुज ९ फलं तदेव ८१
अथ प्रकारांतरेण चतुर्दशानां वर्गः॥ स्थाप्योंत्यवर्ग इत्यादि। १४ अत्रायमंत्यस्यैकस्य वर्गः स्था
पितः द्विगुणेनांत्येन उत्सारितेन ४ गुणिते त्वेवं द्विकेन गते जं ध्वांके पंक्तिनिग्रहशिते जाते ८ संप्र
ति चतुर्थोत्यः उत्सार्य तस्य वर्गकृते १६ अथ तौ कानवाब्रचतुष्कनरूपेण योगतः १९६ अंकयो
जनाज्जातो वर्गः १९६ त्रीहीन स्य शतत्रयस्य वर्गार्थं न्यासः २९७ स्थाप्योंत्यवर्ग इति द्विकस्य वर्गे
२९७ अपरे नवकादयो द्विगुणांत्यनिघ्नाः। अंत्यं स्वउत्सार्योत्सार्य इति कृते ४२९७ चतुष्करूपे
४ त्यत्पके गते। रासो उत्सारिते ४३६ अंत्यस्य नवस्य वर्गस्थापिते ४३६ ३३ द्विगुणेन नव
केन सप्तके हते पंक्तौ स्थापिते जाते ३३ ते ९ ८ १ ६ अत्रास्य जत्ताणोत्यगा ३३ ते सप्तके उत्सारिते
जाते ४८५ सप्तकस्य वर्गे स्थापिते ४९ ३ यातो कावनावाच्चसप्तके मते गते जाते ४८६७ ५ ३
कयो ३ जना जातो वर्गः ८८२०९ पंचाधिकस्य सहस्रदशकस्य न्यासः १००५ स्थाप्यों
त्यवर्ग इत्यादिना जातो पंक्तिः १००१०००००५ अंकयोजना जातो वर्गः १०१००२५ नकीं
तरेण नवानां वर्गः खंडे ४।५ अनयोरभिहति २० द्विनिघ्नी ४० खंडयोर्वर्गौ २५।१६ ते क्यो

पूर्वोक्तयोर्जाते वर्गाः ॥८१ अथ चतुर्दशानां खंडे त्र६ अनयोर्हतिः ८४ द्विनिघ्नी १६८ खंडयोर्वर्गौ १६।४९ एते
क्रमे ०० पूर्वोक्तयोर्जनाता तो वर्गः १९६ अपरखंडद्वये १०।४ एवं तत्फलं तदेव। एवं मन्येऽप्यन्येषा
परेषामन्येषामेका नामप्येवं वर्गः साध्या॥ प्रकारांतरेण राशिः २८७ कल्पितमिष्टं ३ अनेनोनः २८४
पृथक् युक्ते ३०० अनयोर्वधः गुणिते ८२०० इष्टस्य वर्गे ९ अनेन युग् वर्गः ८२०२। सिद्धः
रूपगतं यथा राशिः ११ कल्पितमिष्टं १२ अनेन युक्ते २३ द्वादशायोनवगतः शेषं १ इदं रूपेण वध्ये
२३ इष्टस्य वर्गे १४४ अस्मात् रूपेण शोधिते १२३ जातं ८१ पर्यवर्गः॥ आद्यो कृतौ वा विधिरेष प्रका
र्यः तदानयनं राशि १४ आद्यस्य चतुष्कस्यो वर्गः स्थाप्यः १६ द्विगुणेऽपि निघ्ना १६ अष्टकेन
एककेऽस्मिन् ११ एकस्य वर्गः स्थापिते १ एकके गते ९ अंकयोर्जनाजातो वर्गः १९६
त्तिवर्गः॥ वर्गमूले करणसूत्रं॥ त्यक्त्वांत्याद्विषमात्कृतिं द्विगुणयेन्मूलं समे तद्धृते त्यक्त्वा
लब्धकृतिं तदाद्यविषमाल्लब्धं द्विनिघ्नं न्यसेत् पंक्त्यां पंक्तिहृते समेऽन्यविषमात्त्यक्त्वाप्तवर्
र्गं फलं पंक्त्यां तत् द्विगुणं न्यसेदिति मुहुः पंक्तेर्दलं स्यात्पदं॥ विषम सम विषम सम इत्यादिना
तावत्कुर्याद्यावदंत्याकं भवति॥ अंत्याद्विषमात् विषमपदात् एकत्रिपंच सप्त नवकादि स्था
नात् यदंकादेरां कृतिं त्यक्त्वा वर्गमपास्य तन्मूलं वर्गमूलं द्विगुणयेत् द्विगुणी कुर्यात्समे ॥२॥
समस्थाने तेन द्विगुणीकृतमूलेन हृते भक्ते सति लब्धकृतिं लब्धांकवर्गं त्यक्त्वा अपास्य

कस्मात्तदाद्यविषमात्। तदादि च तत् विषमं तदादिविषमं तस्मात्। ततस्तत् लब्धं द्विनिघ्नं द्विगु
णितं पंक्त्यां श्रेण्यां न्यसेत्। स्थापयेत्। पुनस्तेन द्विगुणितलब्धांकेन समे स्थाने पंक्तिहृते लब्धां
कानां पंक्त्या हृते भक्ते सति प्राप्तवर्गफलं॥ प्राप्तं वर्गं यत् तस्य वर्गफलं तदेव स्यात् अपास्य
कस्मात् अन्यविषमात् समस्थानतोऽग्रस्थविषमात् तत् लब्धं द्विगुणं सत् पंक्त्यां न्यसेत् निवे
शयेत्। एवं मुहुर्वारं वारं समे तद्धृते इत्यादिना कर्म तावत्कुर्याद्यावदंकांको नो समाप्तिर्भ
वति। पंक्तेर्दलं स्यात्पदमिति॥ पंक्तेर्लब्धांकानां पंक्तेर्दलं अर्धं पदस्यान्मूलं भवति। ये अंका
द्विगुणितास्त एवं दलनीयाः॥ अत्रोद्देशकः॥ मूलं चतुर्णां च तथा नवानां पूर्वं कृतानां च सखे कृ
तीनां। पृथक् पृथक् वर्गपदानि विद्धि बुद्धेर्विवृद्धिर्यदि तेऽत्र जाता हे सखे हे मित्र। अत्र वर्गमू
ले भेदाने यदि ते तव बुद्धेः अपीषावि वृद्धिर्बुद्धेर्विशिष्टा वस्तुतिर्जाता प्रादुर्भूता। चतसृ
णां ये ततश्चतुर्णां तथा तेन प्रकारेण नवानां पूर्वं कृतानां कृतिनां भ्रमोत्पादितवर्गाणां
पृथक् पृथक् वर्गपदानि वर्गमूलानि विद्धि जानीहि॥ न्यासः ४।९।१४।८१।१९६।८२०२।१००।१०००२५
क्रमेण मूलानि २।३।२ एषां नवत्याधिक शतस्य मूलानयने यथा। १९६ समचतुरस्रफलं
एषां नवत्यधिकशतं चतुर्दश हस्तमितो भुजस्तत्र कोटिः॥ भुजं भाग हाररा शीकृत्वा हा

त्या कोटि: १४ विषमसम इत्यादिना स्थाने कृते विषमपदस्यैककस्य मध्यात् घट मानां कृ
॥१०॥ ति स्यात्। अत्रैकस्य वर्गे पातिते जाते १ एकं लब्धं तन्मूलं द्विगुणिते समे स्थाने नवरूपे १
हृते जातं १४ लब्धांके द्विगुणिते पंक्तिनिवेशिते ११ तत्र वर्गे पातिते जातं २८ लब्धांके ४ घा
त जातं मूलं ३ लब्धं १४ अत्र राशिकं यथा यदि चतुर्दशामिदं मेः षष्ठेन वर्गपाठ कृतं
लभ्यते। तदेकेन कस्मै लब्धमिति। न्यास: १५२९९१ फलं १४ आद्यांकतो मूलानयनं ॥१९६
विषमात्पदाच्चतुर्णां वर्गे पातिते १६ द्विगुणेन मूलेन समे हृते ५ जातं २ लब्धं पंक्तिनि
वेशिते २ अस्य पदं १४ इदं पदं। अत्र आद्यांकतो मूलानयने त्वन्त्यविषमात् कृति
द्विगुणयेन मूलमिति कृत्वा क्रमात् पंक्तिः स्थाप्या। अन्त्यविषमाद्वर्गस्य वर्गफलं
त्यागसमं वेकत्याज्यं नो चेत्तः स्यकृपे त्यागमिति॥ यथोदाहरणे न्यासः ॥८८२०२ वि
षमादेसादङ्कात् द्विकस्य वर्गे पातिते शेषं ८८२०२ लब्धं मूलं द्विगुणिते ४ समतद्
तः पद लब्धं न्यासः ४८२०२ चतुर्भिः ४ भागे हृते लब्धं शेषमिदं २२०२ स्वस्कोन्नो
लब्धं कृतिं तदादि विषमात् २२०२ लब्धं कृति ८१ त्यक्ता शेषं ५०२ लब्धं द्विनिघ्न ॥१०॥
न्यसेत् पंक्तौ १८ जातं ५८ पंक्तिहृते समे न्यासः ४२८ समे पंक्तिहृते लब्धं शेषं ४२

पंक्तौ द्विगुणं न्यस्यैवं जाता ५८४८ तस्य पंक्तेर् लब्धं २४७ मूलमिदं ४ मूलानयने समस्थाने
भागो हार्यः। विषमस्थाने कृतिः त्याज्या। एतदुदाहरणवत् अन्यत्रापि मूलमानेतव्यं
इति वर्गमूलं समाप्तं॥ घनकरणसूत्रं वृत्तद्वयं॥ समत्रिघातश्च घनः प्रदिष्टः स्थाप्यो घ
नोऽन्त्यस्य ततोऽन्त्यवर्गः आदित्रिनिघ्नस्तत आदिवर्गः त्र्यन्त्याहतोऽथादिघनश्च सर्वे स्थानां
तरत्वेन युता घनः स्यात् प्रकल्प्य तत्खण्डयुगं ततोऽन्त्यं॥ एवं मुहुर्वर्गघनप्रसिद्धावाद्यंक
तो वा विधिरेषः कार्यः॥ समानां त्रयाणां राशीनां हनने परस्परगुणने घनः प्रदिष्टः॥ कथि
तः प्रकारान्तरेणाह॥ स्थाप्य इति। अन्त्यस्यांकस्य घनः स्थाप्यः पंक्तिनिवेशनीयः॥ ततस्त
स्यान्त्यस्य वर्गः स्थाप्यः। केन स्थानान्तरत्वेन। स्थानाधिकत्वेन। एवं स्थापितान्यङ्कानि क
स्थानं यथाधिकं भवति तथा स्थाप्याः॥ किं विशिष्टो वर्गः। आदित्रिनिघ्नः। आदिनाद्यां
केन त्रिभिश्च निघ्नो गुणितः॥ ततोऽनन्तरं आदिवर्गः। आदिपूर्वांकस्तस्य वर्गः स्थाप्यः।
अन्त्याहतः। त्रिभिश्चान्तेनाहतो गुणितः। अथवा त्रिगुणो यो अन्त्यस्तेनाहतः स्थानां
तरत्वेन स्थाप्यः। इति सर्वत्र योज्यं। तथा आद्यघनः स्थाप्यः। तस्यैवाद्यांकस्य घनः। स

वैकाभिर्जिता घनः स्यात् घनो भवति॥ किं कृत्वा। तत् खंडयुगं प्रकल्प्य। तेषां अंकानां खं
डद्वयं रचयित्वा संप्रकल्पयेत्। इति कोऽर्थः। अंत्यांकएकं खंडं। अपरो अंको द्वितीयं
खंडं। एवं खंडस्य रचनां [illegible] त्यात्वा त्र्यंति। याकृत्वेत्यर्थः॥ एवं मुहुर्वारंवारं कृ यावद्या
लि वदंकानां समाप्तिर्भवति। अथवा आद्यांकतः पूर्वोक्त एष विधिः कार्यः। वृ। वर्गघनप्र
॥२४॥ सिद्धौ वर्गश्च घनश्च वर्गघनौ तयोः प्रकृष्टा सिद्धि निष्पत्तिः वर्गघनप्रसिद्धिः तस्यां वर्ग
घनप्रसिद्धौ अत्र वर्गसिद्धिरस्त्यापेक्ष्यो कानन्त्वनया प्रक्रियया। प्रकारांतरमाह खं
डाभ्यां वाहतो राशिस्त्रिघ्नः खंडघनैक्ययुक् वर्गमूलघनस्वघ्नो वर्गराशेर्घनो भवेत्
॥ राशिरंकसमूहः खंडाभ्यां वा भ्यां खंडनीयः। स एव राशिस्ताभ्यां आहतो गुणितस्त्रि
घ्नः त्रिभिर्हतः खंडघनैक्ययुक्। खंडयोर्घनौ खंडघनौ। तयोरैक्यं योगः खंडघनै
क्यं तेन युक्तो युतः। खंडघनैक्ययुक् घनो भवति। वर्गराशेर्घनानयनं। वर्गमूलमिति
वर्गस्य मूलं वर्गमूलं। तस्य घन वर्गमूलघनः। स्वघ्नः स्वेनात्मना गुणितः
स्वघ्न। वर्गीकृत इत्यर्थः। एवं वर्गराशेर्घनो भवेत्। जायेत। अत्रोद्देशकः॥ नवघनं त्रिघ ॥१११॥

नस्य घनं तथा कथय पंचघनस्य घनं च मे। घनपदं च ततोऽपि घनात् सखे यदि घनोऽस्ति घ
ना भवती मति॥ हे सखे हे मित्र। यदि भवतस्तव घने घनकर्मणि मतिर्बुद्धिर्घनास्ति दृढा
विद्यते। ततो नवघनं नवानां घनं कथय। ब्रूहि॥ त्रिघनस्य घनं। त्रयाणां घनस्य घनं
। सप्तविंशतेरित्यर्थः॥ तथा पंचघनस्य घनं। पंचविंशत्यधिकस्य शतस्य मे मम घनं
कथय॥ च समुच्चये। ततस्मात् घनात् घनपदं घनमूलं कथय॥ न्यासः २। २७। १२५ न
वानां घनः ७२९ समत्रिघात इति हते जातं ८१ पुनः ९ हते जातो घनः ७२९ खातकोष्ठपाषा
णादि घनफलं। दैर्घ्यानवहस्तो सम भुज वेधे खाते। किं फलं हस्त फलं। भुजकोटिघा
त इत्यादिना आनीय वेधेन हतं फलं ७२९ एवं विषमचतुरस्र त्र्यस्रादिनां स्वस्वकरणैः
क्षेत्रफलान्यानीय वेधगुणानि खातिकाष्ठपाषाणेषु पिंडगुणानि कृतानि घनात्म
कानि भवंतीत्यर्थः। सप्तविंशतेर्न्यासः २७ स्यात् घनो ८ इति कृते २७ अत्र इत्य
थ अंत्यस्य द्विकस्य वर्ग ४ आदिना सप्तकेन गुणिते जातं २८ त्रिघ्ने ८४ आहते जा
तं ८ स्थानीतरत्वेन युताः पञ्चो न्यासः। ६ तथा आदिवर्गः ४९ त्रिघ्नः १४७ अं
त्य २ हते जातं न्यासः ६ ततः आदि सप्तकस्य घनः ३४३ स्थानीतरत्वेन न्यासः ६
२९४ २९४
३४३

सर्वे युता जातो घनः १९६८३ पंचविंशत्यधिकस्य शतस्य यथा १२५ राशिः। अंत्यस्य घनः १ ततोंत्य
॥२४॥ स्य वर्गः १ आदिनाधिकस्थेन २ घ्नः त्रिनिघ्नश्च ६ न्यासः ६ तत आदिवर्गः ४ त्रिहतः १२ अंत्ये
न एकेन हतः तदेव १२ स्थानांतरत्वेन स्थाप्यः १२ अस्याद्यस्य धिकस्य घनः ८ स्थानांतरत्वे
न स्थाप्यः १६ योजिते जाते १७२८ ततः १७२८ राशिः १२५ खंडयुगमेतादृशं। १२।५ प्रक
ल्प एकखंडे १२ ३ द्वादशमिते। अत्यमस्यत पंच ५ मिते। आदिना पंच के नहते जाते ६०
त्रिघ्न २१६० तत स्थानांतरत्वेन युता न्यासः १७२८ जाता आद्यस्य पंचकस्य वर्गः २५ त्रि
हतः ७५ अंत्येन १२ हतः जाते ९०० स्थानांतरत्वेन २१६ स्थाप्य १७२८ अथाद्य घनस्य
पंचकस्य वर्गः १२५ स्थाप्यः न्यासः १७२८ अंकयोजनाजा तो घनः १२५३१२५
अथ प्रकारांतरेणास्य पंचविंशति घनोयं २।५ यथा। खंडद्वयं २०। ५ आद्यं राशि
२० हते ५०० सप्तमिहते ७ जातं ३७८० त्रिघ्ने जा तं ११३४० खंडयोर्घनो। विंशतेर्घन ८०००
पंचकस्य घनः ३ ३ योगे ८ ३ ३ सर्वांकयोजिते जातोयं घनः १९६८३ पंचविंशत्यधिकशतस्य
खंडे १००। २५ आद्यं राशि १२५ हते १२५०० पंचविंशत्या हते ३१२५०० त्रिघ्नः ९३७५०० खंडयो
घनौ १०००००० पंचविंशतेर्घनः १५६२५ एकत्र सर्वांके योजिते १९७५०० जातो घनः १२५३१२५

२२

एषः वर्गात्रयोषोडशानां घनः। आद्यांकतो घनानयनं। यथा राशिः १२५ अंत्यस्य ५ घ
न स्थाप्यः न्यासः १२५ ततोंत्यवर्ग २५ आदि २ घ्नः ५० त्रिघ्नः १५० स्थाप्यः न्यासः १२५ ततः
आदिवर्गः ४ अंत्याहतः ६० स्थाप्य न्यासः १२५ अथ आदि २ घनः ८ स्थाप्य १२५ न्यासः
स्थानांतरत्वेन योजिते जातं १५६२५ ततः १६ खंडयुगं प्रकल्प्य १२५ अंत्य १६ स्य २५ घनः
स्थापित एवास्ति तत अंत्यस्य वर्गः ६२५ आदि १ घ्नः एकेन ६२५ गुणि तत्वात् देव
६२५ त्रिघ्नः १८७५ अयं स्थानांतरत्वेन योजितं जातं १५६२५ स्थाप्यः यथा न्यासः। शतस्थ
नत्वात् द्विमितानंकान् त्यक्त्वा स्थापनीयं। तत आदिवर्गः अंत्याहत ७५ स्थाप्यः यथान्या
सः १५६२५ अथ आदिघनः स्थाप्यः न्यासः १५६२५ अंकयोजाता जातो घनः १२५३१२५
एवं ७५ वर्गोपि स्थाप्यः कथं स्थाप्यो न्यस्य व ७५ र्ग इति प्रकारः आद्यांकतः कार्यः
॥ अनेनैवाशयेन वर्गघनो प्रसिद्धावित्तु पपन्न इति घनविधिः॥ अथ घनमूले
करणसूत्रं वृत्तद्वयं॥ आद्यं घनस्थानमथाघने द्वे पुनस्तथांत्याद् घनतो विशोध्य घनं
पृथक्स्थं पदमस्य कृत्या त्रिघ्न्या तदाद्यं विभजेत्फलं तु। पंक्त्यां न्यसेत्तत्कृतिमंत्य
निघ्नीं त्रिघ्नीं त्यजेत्तत्प्रथमात्फलस्य घनं तदाद्याद् घनमूलमेवं पंक्तिर्भवेदेवम

स्य पुनश्च। आद्यं घनस्थानं घनसंज्ञं। अथ आनंतर्येण द्वे अघनस्थाने। पुनरेकं घन
स्थानं। द्वे अघनसंज्ञे इति तावत् कुर्यात् यावत् अंत्यं घनस्थानं भवति॥ अंत्यात्
॥१५॥ घनस्थानात् घनमानं विशोध्य पार्श्वयित्वा। पदं घनस्य मूलं॥ प्रथक् स्थाप्यं। अं
त्यघनपदस्य कृत्या वर्गेण। त्रिघ्न्या त्रिभिर्हतया तदाद्यं तस्मात् घनस्थानात् आ
द्यं पूर्वम् अघने पदसंज्ञं विभजेत्॥ हरेत्॥ तु पुनः फलं पंक्त्यां न्यसेत्। तस्य फल
स्य लब्धांकस्य कृतिर्वर्गः। अंत्यनिघ्नी अंत्येन पूर्वलब्धांकेन गुणिता त्रिघ्नी त्रिभि
र्हता॥ फलस्य लब्धांकस्य प्रथमादाद्यंकात् अन्येत विशोधयेत्॥ तदाद्यात्
पूर्वांकात् तस्य फलस्य घनं मानयेत्॥ एवं अमुना प्रकारेण। एकपंक्तिघन
मूलं भवेत्॥ जायेत॥ ततो नंतरं पुनश्च वारं वारं एवं कुर्यात्। यावदंकानां स
माप्तिर्भवति॥ अत्रोदाहरण॥ पूर्वघनफलानां मूलार्थं न्यासः ७२९। १९६८३। १९
५३१२५ क्रमेण घनमूलानि॥ २॥ द्वितीयोदाहरणे न्यासः १९६८३। एकं त्रिकलब्ध
एं घनस्थानं। द्वे अष्टकषट्कलब्धे अघनस्थाने। पुनर्नवलब्धएं घनस्थानं।
अस्मात् स्थानात् द्विकस्य घनं घटते॥ अंत्यात् घनतः घनं द्विकस्य ८ पातिते
जातं ११६८३ शेषमिदं। घनं ८ प्रथक् स्थाप्यं अस्य पदं द्विकलब्धएं यदिदं क

र्यं जातं। २। अथ कृत्वापि तस्य अस्य कृतिः ४ त्रिघ्नी १२ अनयात् घनशेषस्य ११ आ
द्यं तदाद्यं ११६ विभजेत् न्यासः (१२)११६(९) लब्धे विनष्टेय नव लब्धे। इति कृते लब्धं। ९ शे
षमिदं ३२८३ फलं पंक्त्यामिति पूर्वे घने पदं स्थापितं यत्रास्ति तत्र न्यसेत्॥ जातं २७ त
तः तस्य फलस्य ९ कृतिः ८१ अंत्येन द्विकेन हता १६२ त्रिघ्नी ४८६ तदाद्यात् ३२८ तत
प्रथमात् तस्मात् ३२ प्रथमात् ८ त्यजेत् न्यासः ४८६ तदाद्यादिति अत्र शेषांकाद्दैव घ
नं त्यजेदित्यर्थः॥ तत् कथं तदा दैराशिमांकं (३२८) व्यात् फलं ७ अस्य घनं ७२९ लब्धे
जातं॥ शून्ये तस्मादागतो राशिः २७ घनमूलमिदं॥ तृतीयोदाहरणे न्यासः १९५३१२५
अस्य मूलानयनं यथा॥ घनस्थानं एकं ५ अघनस्थाने द्वे १२ घनस्थानं ३ अघनस्था
ने द्वे ९५ घनस्थानं १ अंत्यात् घनतः घनं विशोध्य घनं पृथक् स्थं १ अस्य पदं १ स्थाप्यं अं
त्यकृत्या त्रिघ्ना ३ तदाद्यं ९ विभजेत्। लब्धं २ शेषं ३ तत्कृतिं लब्धस्य २ कृतिः ४ अंत्य
निघ्नं। त्रिघ्नी १२ तत् प्रथमात् ५ त्यजेत् शेषं २३ एवं २३३१२५ फलस्य २ घनं ८ तदाद्यात्
२३३ त्यजेत् २२५१२५ लब्धं १२ पंक्ति जाता। एवमतः पुनश्च पुन घनस्थानं क्रियते। अं
त्यात् घनतः घनं पंक्तिघनं १७२८ मतं विशोध्य अवशिष्टं जातं तदेव २२५१२५ अस्य प
दं पंक्तिरेव प्रथक् स्थाप्या १२ अस्य पदस्य १२ कृत्या १४४ त्रिघ्ना ४३२ तदाद्यं तेषां २२५

आद्यं विन्नजेत् न्यासः २२५१२५ अत्र प्रथम घनस्थाने ५ शेषं ९२५ अद्यं फलं ५ एवं क्रमात् स्थितं १२५
तत्कृति तस्य फलस्य कृती २५ अंत्यं १२ निघ्नी ३०० त्रिघ्नी २०० क्रमात् प्रथमात् तस्य २१२५ प्रथमा
॥१४॥ स्य जेत् न्यासः २००५ त्यक्ते शेषं १२५ फलस्य घनं १२५ घनमूलपर्यायः तद्घातस्य १२ आ
घात् ५ स्य जेत् १२५ गतो राशिः लब्धं घनमूलं १२५ इति परिकर्माष्टकं। आद्योकतो
घनमूलानयने॥ न्यासः १९६८३ अस्मात् सप्तकस्य घनस्य ३४३ अतो घने पातिते जातं
१२३४० पदं ७ पृथक् स्थाप्यं। पदस्य ७ कृतिः ४९ त्रिगुणा १४७ अनया लब्धं जनार्थं न्या
सः १२३४० लब्धं २ शेषं १६४० लब्धे के पंक्ति निवेशिते २७ लब्धं २ कृति ४ त्रिहता
२२ ५४ अनेन सप्तकेन ७ हता ८४ शेषके पातिते ९८ जातं शेषं द्विकस्य घने ८
पातिते शून्यं जातं मूलं २७ मिदं मेवं सर्वं घनमूलानयनं। इति लीलावती टीका
परिकर्माष्टकं॥ अथ भागजातिचतुष्टयम्॥ अंशानां सवर्णनं छेदैः सह समानकरणमित्यर्थः
। यथा रूपाणां छेदः अर्धं त्रिभाग चतुर्थभागा द्वयो भवंति॥ तदा रूपाणामपि तावद्
भागाः कर्तव्या इत्यर्थः। तत्रांशसवर्णनं चतुर्भेदं। यथा इति। भागजातिः १ प्र
भागजातिः २ भागानुबंधजातिः ३ भागापवाहजातिः ४ तत्र प्रथमं भागजातौ
करणसूत्रं॥ भागानां जातिर्भागजातिः तस्याः सूत्रं करणसूत्रं॥ अन्योन्यहाराभि॥ २४

निहतौ हरांशौ राश्योः समच्छेदविधानमेवं। मिथो हराभ्यामपवर्तिताभ्यां यद्वा हरां
शौ सुधियात्र गुण्यौ। राश्योर्द्वयोर्हरांशौः हरश्च अंशश्च हरांशौ॥ अन्योन्यहाराभिहतौ॥
परस्परछेदगुणौ प्रथमराशेः छेदेनापरराशेर्हरांशौ गुणनीयौ। एवं अमुना प्रकारे
ण समच्छेदविधानं तुल्यछेदगुणो प्रथमराशेः छेदेनापरस्य राशेर्हरांशौ गु
णनीयौ। एवं अमुना प्रकारेण समच्छेदविधानं तुल्यछेदकरणं भवति यद्वा
मिथः परस्परं सुधिया सुबुधिनापवर्तिताभ्यां छिन्नाभ्यां हरांशौ छेदलवौ तुल्यौ
॥ गुणनीयौ एवं सदृशाछेदाः स्युः॥ अत्रोद्देशकः॥ रूपत्रयं पंचलवस्त्रिभा
गो योगार्थमेतान्वद तुल्यहारान्॥ त्रिषष्टिभागस्य चतुर्दशांशः स
मच्छिदो मित्र वियोजनार्थं॥ रूपाणां त्रयं रूपत्रयं। पंचलवो रूपस्य पंच
मांशः। त्रिभागो रूपस्य तृतीयांशः। हे मित्र एतान् तुल्यहारान् समच्छेदान् यो
जनार्थं वद॥ कथय॥ त्रिषष्टिभागः। त्रिषष्टितमो भागः चतुर्दशांशः
चतुर्दशांशो भागः एतौ समच्छिदौ वियोजनार्थं वद। कथय॥ ३ १ १ छे
दसादृश्यार्थं न्यस्त व्यस्त छेदाभ्यां राश्यो न्यासः ३ ५ अथ ६३ १४ छे
दे॥ २५

नछेदेन पंचकेन एकेन त्रिकेन च हृते। तथा एककेन छेदेन पंचकेनैककेन हृते
अधस्तनछेदानामेकैकेन च जातो [illegible] तृतीयराशिना सह छेदसाद्रूपं [illegible] अस्य
व्यस्ते छेदान्यां जातं [illegible] त्रिके [illegible] न पंचकेन पंचकेनैकेन च गुणिते [illegible] ते
। यथा पंचकत्रिकेनैकेन च गुणिते तथा पंचकेन त्रिकेनैककेन च गुणिते अ-
॥२४॥ धस्तनछेदानामेकैकेन च न्यासः समछेदा [illegible] योगे जातं ५३ द्वितीयो
द्धरणे न्यासः [illegible] सहापवर्त्तितौ हरौ छेदसा [illegible] दृरूपार्थं [illegible] स्तौ स्था-
पितौ [illegible] अथवा [illegible] छेदे हरेण गुणितौ जातौ समछेदौ २ [illegible] वियोगे
जातं [illegible] २२५ इति भागजातिः॥ अथ भागानुबन्धजातौ करणसूत्रं [illegible] त्रं वृत्तं
[illegible] गानां भागा यस्यां सा भागभागा सा चासौ जातिश्च भागभा-
गजातिः तस्यां भागभागजाति। तस्यामेव भागानां भागा इत्यर्थः॥ तत्र
करणसूत्रं॥ लवा लवघ्नाश्च हरा हरघ्ना भागप्रभागेषु सवर्णनं स्यात्॥ ल-
वा अंशा लवघ्ना अंशाहताः हराश्छेदा हरघ्नाश्छेदहताः। भागप्रभागेषु स-
वर्णनं स्यात् भागानां प्रभागा भागप्रभागास्तेषु भागप्रभागेषु एवं समुनाप्र-
कारेण सवर्णनं स्यात्। अंशा सवर्णने भवति॥ अत्रोदेशकः॥ द्रम्मार्द्धत्रि- २५

[illegible] गवदस्य षोडशांशाः ३८० भागवदस्य चतुर्थांशा ३८० भागे हृते लब्ध एको वराटको दत्तः २
लवद्वयस्य सुमते पादत्रयं यद्भवेत्तत्पंचांशकषोडशांशचरणः संप्रार्थितेनार्थिने
दत्तो येन वराटकाः कति कदर्येणार्पितास्तेन मे ब्रूहि त्वं यदि वेत्सि वर्गगणिते। जाति
प्रभागाभिधां॥ हे सुमते हे सुबुद्धे येन पुरुषेण प्रार्थितेन अभ्यर्थितेन समता॥ अर्थि-
ने याचकाय। द्रम्मार्द्ध। द्रम्मस्य अर्द्धं त्रिजवानां द्वयं त्रिजवद्वयं। तस्यार्द्धभागत्रयस्य [illegible]
द्वयमित्यर्थः। पादत्रयं। पादानां त्रयं पादत्रयं। एवं किं भागद्वयस्य चतुर्णां भागानां
भागत्रयं यत् भवेत् पादत्रयमित्यर्थः॥ तत्पंचांशस्तस्य भागत्रयस्य पंचांशः पंच-
मो भागः। षोडशांशश्चरणः तस्य पंचांशस्य षोडशांशो भागस्तस्य चरणश्चतुर्थांशो दत्तः
दत्तो देयस्तेन कदर्येण धनलुब्धेन वराटकाः कति दत्ताः अर्पिताः त्वं ब्रूहि। कथय
। यदि गुणिते पाटीगणिते भागप्रभागाभिधां प्रभागानां जातिं वेत्सि जानासि। न्यासः
[illegible] लवा लवघ्ना इति। एकका एकेन गुणितास्ते [illegible]॥ द्विकेन त्रिगुणि-
ते जातं ६ हरा हरघ्ना इति द्विकेन त्रिकेन गुणिते ६ षड्भिश्चतुर्भिर्हताः २४
पंचकेन चतुर्विंशति हता जाता १२० षोडशनिर्विंशत्यधिकं हतं १९२० अयं चतुर्भिर्हते
जातं ७६८० सवर्णितौ यो हरांशयोरेकत्र न्यासः [illegible] बहुभिरपवर्तितौ हरांशौ १
एते वराटकभागाः। अत्रालापः॥ अत्र राशि ७६८० शी [illegible] अत्र त्र्यधिके [illegible]
[illegible] भागे हृते लब्धं शून्यं। द्रम्मस्यापि षोडशांशाः [illegible] णा इति षोडशांशा गुणे-
यथात्रालापः द्रम्मस्य १ वराटकाः १२८० अस्यार्द्धं ६४० अस्य त्रिजवः ६४० अयं द्वि- १
गुणः १२८० अस्य पादः हरघातो भवति भागं ३२० अयं त्रिगुणः ३२० [illegible] त्पार्पं [illegible]

[illegible] हृते ज्ञ [illegible] किली॰ विंशति व राटके रे काकाकि लीति॥ का किलीवि शति गुण वराटको भवति

[illegible] भाग जाति [illegible] विना ग

॥२६॥

रूपलो भवति॥ २९॥ भागे हृते परस्परानां रूपं० पणश्च तस्याः काकिण्यः चतुर्गुणाः
पणः। काकिण्यो (१२०) वेति। १२० भागे हृते लब्धो वराटकाः ९॥ अर्थिने दत्त इति
इति भागाद्भाग जातिः॥ भागानुबंध भागापवाहयोः करणसूत्रं सार्द्धवृत्तं
। अनुबंधनं अनुबंधं संयोजनं। भागानां अंशानां अनुबंधो यत्र। स भागानुबं
धः। अपवहनं अपवाहः॥ भागानां अंशानां अपवाहो वियोजनं यत्र स भागापवा
हः। भागानुबंधश्च भागपवाहश्च भागानुबंध भागापवाहौ भागानुबंध भागाप
वाहयोः॥ तत्र करणसूत्रं॥ छेदघ्नरूपेषु लवा धनर्णमेकस्य भागा अधि
कोनकाश्चेत्॥ स्वांशाधिकोनः खलु यत्र तत्र भागानुबंधे च लवापवाहे
। तलस्थहारेण हरं निहन्यात् स्वांशाधिकोनेन तु तेन भागान्॥ एकस्य एकघ्ना
दि लहरण स्य रूपस्य भागा अंशाश्चेद्यदि भागा अंशाः अर्द्ध अंशाद्या अधिकेनेकाः
॥ अधिकाश्च ऊनाश्च अधिकोनकाः। छेदघ्नरूपेषु। छेदेन घ्नानि गुणितानि रूपाणि छे
दघ्नरूपाणि तेषु। लवाः अंशाः धनर्णं धनं च ऋणं च धनर्णं कर्त्तव्या इत्यर्थः॥ भागा
नुबंधे लवापवाहे च राशौ यत्र स्वांशात् आत्मीयांशार्द्ध अंशाच्चतुर्थादि। अधिकोनः
॥ अधिकश्च ऊनश्च अधिकोनश्चेत् तत्र खलु निश्चयेन तलस्थहारेण॥ तलस्थ

॥२७॥

धो भागेति प्रतीतिः तलस्थः। स च सो हारश्च तलस्थहारः। तेन तलस्थहारेण॥
हरं ऊर्द्ध छेदं निहन्यात् गुणयेत्। तु पुनः तेन हारेण स्वांशाधिकोनेन स्वांशेन अधिको
नेन स्वांशेन अधिकेन ऊनेन वा। कोर्थः। भागानुबंधे स एव हारः स्वांशाधिकः कार्यः
लवापवाहे स्वांशेन ऊनः कार्यः॥ इत्यर्थः॥ तेन स्वांशाधिकोनेन हरेण भागान् हन्या
त् गुणयेत्। अत्रोद्देशकः॥ स्वांघ्रि द्वयं त्र्यं व्यङ्घ्रिकी दृक् ब्रूहि सवर्णितं॥ जानासि
अंशानुबंधं चेत् तथा भागापवाहनं॥ द्वयो रूपयोर्द्वयं साङ्घ्रिः। स चरणांघ्रिणा चतु
र्थांशेन वर्त्तत इति साङ्घ्रिः द्वयं। रूपाणि त्रयं रूपत्रयं व्यङ्घ्रिः विगतोङ्घ्रिश्चतुर्था
शो यस्मात् व्यङ्घ्रि। सवर्णितं अंशानुलंकृते कीदृक् भवति। ब्रूहि वद। यदि अं
शानुबंधं तथा लवापवाहं च वेत्सि। जानासि चेत्। न्यासः। २ ३ | छेदघ्नरूपेषु
छेदेन चतुर्भिर्द्विके गुणिते तथा चतुर्भिस्त्रिके हते जातं। ८ १२ | ८ १२ कलवा ऋणे
ऽष्टासु धनीकृते जातौ तः परतः एक ऊर्ध्वलवः ऋणं ते। ४ ४ | घाद्वरेण
मध्यात्॥ जातं पातितः॥ इति क्रमेण जातं॥ ९ ११ द्वितीयोदाहरणं॥ अङ्घ्रिः स्वत्र्यं
शयुक्तः स निजार्द्धयुक्तः कीदृक् ...॥ अंशानुबंधे ... तानु
वदसि तोतो त्रिभिः सप्तभागैः अर्द्धं स्वाष्टांशाहीनं नवभिश्च युक्तं सदाशांशो

स्वकीयैः कीदृक् स्यात्॥ ब्रूहि वेत्सि त्वमिह यदि सखे त्वं भागानुबंधापवाहे। हे सखे
। हे मित्र। इह त्वं भागसवर्णने त्वं। अंशानुबंधापवाहौ अंशानुबंधश्च अपवाहश्च अंशा
नुबंधापवाहौ। यदि वेत्सि। जानासि॥ अंघ्रिश्चतुर्थांशः स्वत्र्यंशयुक्तः स्वेन आत्मीयेन
॥२७॥ त्र्यंशेन युक्तः स्वतृतीयभागेन युक्तः सहितः। स च अंघ्रिर्निजदलयुतः निजेन आत्मी
येन दलेन अर्धेन युक्तः सहितः कीदृशः स्यात्। च समुच्चये। तु पुनः अंशौ द्वौ
तृतीयांशौ अष्टांशहीनौ अष्टमांशरहितौ तदनु च पश्चात् त्रिभिः सप्तभा
गैः सप्तमांशैः रहितौ कथ्यौ स्तः भवतः। अर्धं रूपार्धं स्वाष्टांशहीनं स्वीयेन
आत्मीयेन अंशेन हीनं ऊनं स्वाष्टांशहीनं। अथ च स्वकीयैः आत्मीयैः नवभिः
सप्तमांशैर्युतं सहितं। कीदृक् स्यात् कथय॥ न्यासः॥ तत्र १ २ १
स्वहारेण हरं निहन्यादिति॥ तत्र स्वहारेण त्रिकेण ऊर्ध्वहरेण चतुष्के हते जातं १२
स्वांशाधिकेन छेदेन भाज्यकेन एकरूपे हते अधस्तनछेदाभावे कृते जातं ४
पुनः तत्र स्वहारेण द्विकेन ऊर्ध्वहरे द्वादशरूपे गुणिते द्विकेन द्विके
ते भागे च चतुष्करूपे हते अधस्तनछेदाभावे कृते च जाते १२ इमौ दाह ३ भागानि ॥२७॥
रूपवर्तितौ २ द्वितीयराशेः सवर्णनं तत्र स्वहारेण अष्टकेन ऊर्ध्वहरे त्रिके ह

हते जातं २ अंशोनत्वेन अथ सप्तकेन अंशेन कृते जातं २ भागेनेन सप्तकेन
ऊर्ध्वत्रिकेण २ द्विके न हते छेदाभावे कृते जातं २ अथ छेदे ७ न सप्तकेनोर्ध्वछेदे
चतुर्विंश ३ ति ... जातं ... अथ छेदे ३ शान्ते कृते ३ ऊर्ध्वांशे चतुर्दशरूपे
पे हते अ... अधस्तनछेदाभा ३ वे कृते जातं ५/५६ षट्पंचाशद्भिरपवर्तितौ १/३ तृ
तीयराशेः सवर्णनं राशि २ तत्र स्वहारेण अष्टकेनोर्ध्वहरे द्विके हते जातं
अंशोनकृते जातं भागेन छेदेन सप्तकेन ऊर्ध्वांशे एकके हते छेदाभा
वे च कृते जातं अथ छेदेन सप्तकेन ऊर्ध्वछेदे षोडशरूपे हते भा
... अधः छेदे अंशानुते के ऊर्ध्वांशे हते अधस्तनछेदाभा
वे कृते जातं स्वेनैवापवर्तिते सवर्णितराशित्रयस्य दर्शनं
भागानुबंधजाति मो च इति कथमाचार्येण जातिचतुष्टयं वर्णितं भा
गभागविपरीतक सूत्रं लीलावत्यां ... भागमातृजातिश्चतुष्ट
यकालिका अतोगतार्थं विज्ञेयं॥ इति जातिचतुष्टयं॥ ...
...तयोः करणसूत्रं वृत्तार्धं॥ अर्धं अंशाचतुर्थांशादि ... निषेधते यत्
...न्नो। यत्रानिन्नराश्यो न हारितार्थः किंतु योगांतरविषयः सूत्रे तच्चैव

॥१८॥

समाएवोतान्निन्नेचतेसंकलितव्यवकलितेचन्निन्नसंकलितव्यवकलितेतयो
र्निन्नसंकलितव्यवकलितयोः सवर्णस्त्रकरणं॥ योगांतरं तुल्यहरांशकानां कु
र्योहरो रूपमहरराशेः॥ तुल्यासमानाः हारछेदा येषां ते तुल्यहाराः तुल्यहाराश्चते अं
शकाः तेषां तुल्यहारांशकानां योगो मिलनं अंतरं वियोगः कार्यः। कोऽर्थः सदृश
छेदेषु अंशानां मिलने संकलिते व्यवकलिते अंतरं कार्यमित्यर्थः। अहारराशौ रूपं छेद
राशेः रूपं एक जहराणं हरः छेदः कल्प्यः। अत्रोद्देशकः॥ पंचांशपादत्रिलवार्द्धषष्ठाने
कीकृतान् ब्रूहि सखे ममाशु। एभिश्च भागैरथ वर्जितानां किं स्यात्त्रयाणां कथयाशु
शेषं। हे सखे विद्वन्नत्र पंचांशः पंचमो भागः पदश्चतुर्थांशः त्रिलवस्तृतीयो
भागः। अर्द्धं रूपार्द्धं षष्ठः षष्ठो भागः। एतानेकीकृतान् योजितान् मम ब्रूहि।
अथानंतरं एभिरेव भागैर्विवर्जितानां ऊनीकृतानां त्रयाणां शेषं ब्रूहि किंस्या
त् किं यद्भवति। अस्य शीघ्रं कथय वद। न्यासः [५ ४ ३ २ ६] न्यस्तव्यस्तछेदान्योन्यगु
णार्थं न्यासः [३ ४] चतुष्कं सप्तपंचकेनाककेन [illegible] वहतेपंचकेनचतुष्के
एककेचहतेवि [illegible] नष्टयेन गुणितमित्यधस्तनछेदान्नावे जातं [२० ५] छेदस्यादृश्या
त् कृते जातं [२०] अपरराशेन्यासः [३ ६] त्रिकस्य तृतीयांशे [illegible] [२० २०] ण तीया
द्विरे एवमन्य स्तव्यस्तछेदान्योजा ते यथा [३ २ / ६ १] द्विकेन त्रिके एकके च हते ए
ककेन षट्के एकके च हते अधस्तन छेदान्नावे [३ २] वकृते जातं [६ ६] छेदस्यादृश्या

द्युतो जातं [३ ६] आभ्यां सपवर्णे [illegible] पूर्वसवर्णेतराशिः न्यासः [६ २०] न्यस्तव्यस्तछेदान्योन्य
हता जातं [६ २०] [२०] छेदस्यादृश्यात युतो जातं [२०] एभिरेव भागरूपं यत्र वर्जितां छेदसादृश्या [२० १]
र्थं रूपत्रयं [२० ३ / २० १] एस सहन्यासः [२० ३] नस्तव्यस्तछेदान्योन्यासः [२० ३ / २० २०] विश्वसात्रिके एककेवहते
। एककेदं [२० १] तदेवाऽधस्त [२०] नछेदान्नावेकृते [२० ६० / २० २०] [२० २०] छेदस्यादृश्यात् अंतरं कृते
जातं [३ २०] इति भिन्नसंकलितव्य वकलितानि नव [illegible] एवमर्थ एवं दशौ। अथा
[illegible] छेदवधेन नष्टो अर्थं भिन्निन्ने गुणेन फलं तत्॥ पूर्वोदाहृतयं पंचांशपादत्रिल
वार्द्धस्यत्रस्य सवर्णरूपांशास्तत्र रूपशब्देन यत् किं चित्किमपि मर्यादितं संभवति तायंस्य
ति। वस्तुद्रव्येषु सत्सु निष्कात्मकं द्रम्मात्मकं वेतिधान्येषु खारिद्रोणाद्यक्रमात्मकं निरू
पाणि हस्तितुरगादीनि एकवस्त्रगुंजादिनिश्चयात्मकं कल्पनीया। निश्चयं च यथाकालव्यवहार्य
सावयवं विभागयोग्यं वस्तुजातं द्रव्यजातं वा रूपशब्देन कल्पनीयं। नमत्र वस्तुजातं त
त्कालात्मकं। अत्रोदाहरणे षष्टिनाड्यात्मकमेव रूपशब्देन प्रकल्पितं। तत्पूर्वोक्तप्रका
रेण दिनरात्रिविभागानां एकीकरणं छेद [२७ २०] छेदेन भागे हृते लब्धं ० शेषं ५७ दिनात्मक
त्वात् षष्ट्या संगुण्य ५७ विंशतिना भागे हृते लब्धं २७ भागगुणं न चैदिनस्य पंचमो अंशो द्वादश
घटः। चतुर्थांशः पंचदश घटः तृतीयांशो विंशतिर्घटः। अर्द्धं त्रिंशद्घटः षष्ठांशो दशघटः।
कथितामानेकं ७ दिनात्मकत्वात् षष्ट्या भागं कृते [७ २०] जातं ७ लब्धं १। द्विनां शेषं पूर्ववत्
एतच्च [२० २०] दिनत्रयात्मकरूपात् सो धनशेषं [५ २०] भागे लब्धं १२७ वा पूर्वभागे हृते लब्धं ५७

दिनत्रयात्मकं शोधितेशेषं॥ ३३ पूर्ववत्तु न्यासमेव सर्वत्र विचारणीयं सुधिया। अंशाहतिः। अंश
शाहतिः। छेदयोर्वधः छेदवधस्तेन छेदवधेनाभक्ता इत्यासती। लब्धं अंशाहतं फलं भिन्नगुणने फ
लं स्यात् भवति॥ उदाहरणद्वयं॥ सत्र्यंशरूपद्वितयेन निघ्नं सस त्र्यंशमीशाद्वितयं भवेत्किं। अ
र्धं त्रिभागेन हतं च विद्धि दक्षोसि भिन्ने गुणनाविधौ चेत्॥ सहत्र्यंशो वर्तते सत्र्यंशो
यत् द्वितयं तत् सत्र्यंशं शाद्वितयं। सत्र्यंशरूपद्वितयेन। सह त्र्यंशेन वर्तते सत्र्यंशस्त्र्यं
॥१९॥ सत्र्यंशं यद्रूपद्वितयं। तत् सत्र्यंशरूपद्वितयं तेन सत्र्यंशरूपद्वितयेन। निघ्नं किं स्यात्॥ इतिस्वल्प
किं हत्कं भवति॥ च समुच्चये। अर्धं रूपार्धं त्रिभागेन रूपत्र्यंशेन हतं गुणितं तत् कीदृक्
भवति। भिन्नसंज्ञा गुणनविधौ गुणनक्रियायां दक्षोसि कुशलोसि भवति॥ न्यासः। २ । १ । छेद
घ्नरूपेषु लवाधिनाः सवर्णिते॥ ७ । ३ । अंशाहतिरित्यादि कृते ४९ । ९ । भक्ते लब्धं। त्रैराशिकं ७ । ३ । क
ल्पनात्र यद्येकेन रूपेण पञ्चद नासत्र्यंशमिष्टं तदा सत्र्यंशेन किमिति॥
न्यासः १ । ५ । ७ । फलं तद्दत्वा अत्रायातं क्षेत्रवासना यत्र सत्र्यंशं शाद्वितयं भुजः
सत्र्यंश ३ । ३ । द्वितयं कोटिः तत्रायातं किं फलमिति न्यासः ७ । ७ भुजकोटिघातं फलं
तदेव पदं इति यो दाहरणं॥ १ । १ हृते जातं २ । ६ ननु गुणकारेण गुणावर्धते। कथं अर्धं त्रि
भागेन हतं त्रुटतीति सत्यं रूपावयवया गुणकारो विहितः। ननु भागहारेप्येवं या
भागेर्थात् गुणिते भागा वर्धन्ते। भागश्चोत्सवस्यो राशिस्त्रुटति। बहुभागपुष्टि न ज्यमा
नो राशिः स्वल्पो भवति॥ तत्र त्रैराशिकं भवत्यनयः। यदि रूपेण कुंकुमजेऽर्धं

८१३
न्यते। तदा रूपत्र्यंशेन किमिति न्यासः। १ । १ । १ । लब्धं फलं १ । ६ । एवं भाववद्भावं त्रुटि
भवति। इति भिन्नगुणकरः। भिन्नभागहारकरणसूत्रं॥ छेदं लवं च परिवर्त्य हरस्य
शेषः कार्योथ भागहरणे गुणनाविधिश्च। हरस्य भागहारस्य छेदं लवं परिवर्त्य वि
पर्ययं कृत्वा। अथानंतरं भागहरणे भागहारे शेषः परिशिष्टो विधिः गुणनाविधिः
कार्यः। कोर्थः। भाज्यकस्य राशेर्हरस्यापि लवः कार्यः। लवस्थाने हरं छेदं संस्थाप्य। ए
वं विपर्यासं कृत्वा अंशाहतिरित्यादि विधिः कार्यः। इत्यर्थः। उदाहरणं। सत्र्यंशरू
पद्वितयेन पंचत्र्यंशेन षष्ठं वद मे विभज्य। दर्भीयगर्भाग्रसुती शलाके बुधि चे
दस्ति तेभिन्नविधौ समर्थः॥ पंच। पंचरूपाणि सत्र्यंशरूपद्वितयेन। त्र्यंश। षष्ठ
रूपद्वितयेन भक्तं मे वद ब्रूहि॥ त्र्यंशेन तृतीयांशेन षष्ठं षष्ठं भागं विभ
ज्य॥ अत्र च शब्दाचेत् यदि तव भिन्नभागहारविधौ दर्भीयगर्भाग्रसुती च्या
बुधि। भवति त्वो समर्थो भवति॥ न्यासः ५ । १ । सवर्णिते ५ । ७ । हरस्य राशिछेद
लवयोः परिवर्तने कृते ५ । ३ । अंशाहतिरित्यादि नाज्ञा ५ । ७ । भक्ते लब्धं
२ । ३ । अत्र त्रैराशिकं। सत्र्यंशरूपद्वितयेन वंदनस्य पंच पचानि लभ्यंते तदा रूपे
णेन किमिति। न्यासः ७ । ५ । १ लब्धं फलं तदेव॥ अथ क्षेत्रवासना। यत्रायतक्षे

त्रफलं दृष्टं पंचकं। सप्तदशरूपाधिनयं नतः तत्र का कोटिरिति न्यासः। ३ । ७ नां
शायोः छेदांशविपर्यासं कृत्वा भाहतिरित्यादिना लब्धा कोटिः ३ । द्वितीयोदा
हरणे न्यासः। ३ । १ हरराशेः छेदांशविपर्यासं कृत्वा [illegible] इत्यादिना हते जातं ३
॥२०॥ त्रिनिरूपणे [illegible] २ । अत्र त्रैराशिकं। दिनत्रयेण [illegible] कश्चित् कर्म करोति रूपषट्कं [illegible]
लभ्यते तद् दिनेन [illegible] किमिति न्यासः। ३ । ६ । १ । लब्धं २ इति भिन्नभागहारः। भिन्न
वर्गादिकरणसूत्रं वृत्तार्द्धं। वर्गे कृतिघने विधौ तु घनौ विधेयौ हारांशयोरथ
पदे च पदप्रसिद्ध्यै। वर्गे वर्गविधाने हारांशयोः छेदलवयोः कृतिर्वर्गो विधे
यो घनविधौ घनविधाने घनौ हारांशयोः विधेयौ। कर्तव्यावित्यर्थः। अथानन्तरं
पदप्रसिद्ध्यै मूलार्थं पदे वर्गमूले घनमूले हारांशयोः कर्तव्ये इत्यर्थः॥ उदाहर
णानि॥ सार्द्धत्रयाणां कथयाशु वर्गं वर्गात्ततो वर्गपदं च मित्र। घनं च मूलं च
घनात्ततोपि जानासि चेद्वर्गघनौ विभिन्नौ॥ हे मित्र हे सखे। विभिन्नौ अर्द्ध
त्र्यंशादिभिन्नौ वर्गघनौ यदि जानासि वेत्सि॥ तत् सार्द्धत्रयाणां अर्द्धाधिकरूप
त्रयाणां आशु शीघ्रं वर्गं कथय। तस्मात् वर्गात् वर्गमूलं कथय। च समुच्चये। एव
मेव घनं वद। तस्मात् घनात् घनमूलं कथय न्यासः ३ १/२ सवर्णिते जातं ७/२

२०

हरांशयोर्वर्गौ ४९/४ [illegible] लब्धं ४९/४ अत्र त्रैराशिकं। यद्येन रूपेण सार्द्धचरणपञ्चत्रयं
वर्गैक्यपदं कृतिः स्यात्॥ समानलंबे लघुदोः कुयोगान्मुखान्यदोः संयुतिरल्पिका स्यात्। समानलंबस्य चतुर्भुजस्य समानौ लंबौ यस्मिन् तत् समानलंबं समानलंबं च तत् चतुर्भुजं च तस्य समानलंबचतुर्भुजस्य क्षेत्रस्य मुखोनां भूमिं मुखेन ऊनां भूमिं परिकल्प्य। भुजौ ह्रस्वौ वा ज्ञानाय भुजौ प्रकल्प्य तस्य क्षेत्रस्य त्र्यस्रवदेव साध्ये॥ त्रिभुजे भुजयोर्योग इत्यनेन सूत्रेण साध्ये। ततः आबाधे सकाशात् लंबमितिः साध्या। स्वाबाधे भुजकृत्योरित्यादिना॥ आबाधयोना चतुरस्रभूमिरिति। चतुरस्रं चतुर्भुजं तस्य भूमौ॥ आबाधयोना लंबलघुखंडेन हीना तल्लंबवर्गैक्यपदं। तस्या भूर्वा लंबस्य च वर्गौ तल्लंबवर्गौ तयोरैक्यं तस्य पदं मूलं कृतिः स्यात् कर्णो भवति॥ एवं तद्भूनम्नर्वों सम। न्वितस्येति य उक्तं तदेवाविशिष्टं लघुत्तरार्धं नानेन। समानाविषमलंबयोर्लक्षणमाह॥ समनलंब इत्यादि॥ तुल्यलंबक्षेत्रे लघुदोः कुयोगात् लघुभुजधरायोगात् मुखान्यदोः संयुतिः। मुखं च अन्यदोश्च मुखान्यदोषौ तयोः संयुतिर्योगो मुखान्यदोः संयुतिः मायुतिः प्रायुतिः ह्रस्वयुतेरल्पिका स्यात् हीना भवति। विषमलंबे सा युतिर्विपरीता भवतीत्यर्थः॥ उदाहरणं॥ द्विपंचाशन्मितत्र्येकचत्वारिंशन्मितौ भुजौ॥ मुखं तु पंचविंशतिमितं तु स्यात् षष्टिर्मही किल। अत्र तुल्यलंबकं क्षेत्रमिदं पूर्वैरुदाहृतं॥ ना इयं त्रिचतुःषष्टिनियतेकर्णयोर्मिती॥ कर्णौ तत्रापरो ब्रूहि समलंबे चतुर्भुजे॥ क्षितिसंमावैना यां। तत्र भुजौ बाहू द्विपंचाशन्मितस्त्र्येकचत्वारिंशन्मितौ॥ द्विपंचाशन्मितश्च त्र्येकचत्वारिंशन्मितश्च त्र्येकचत्वारिंशन्मितौ। तु पुनः मुखं पंचविंशतिमितं तु स्यात्। पंचविंशतिहस्तप्रमाणं। मही धरा षष्टिमिता षष्टिप्रमाणा॥ इदं क्षेत्रं पूर्वैराचार्यैरत्र

ऽसमलंबक विषम मानलंबकं भुजाद्वलंबस्थितं। कर्णयोर्मिति [illegible] नियते [illegible] पंचा
[illegible] एकः कर्णो षट्पंचाशन्मितः [illegible] ॥ अन्य [illegible] तत्क्षेत्रे अपरो [illegible]
[illegible] यत् एवंविधे क्षेत्रे समलंबके तु [illegible] अथ [illegible] लंबकेन
[illegible] ॥ न्यासः

[illegible] चतुरस्रक्षेत्रे इष्टे कर्णे कल्पिते ॥ [illegible] कर्णानयनं ॥ तद्
था ॥ कर्णः कथं निश्चितं स्यात् । तद्दिशतुं [illegible] कोन [illegible] ॥ एवमुत्र
दर्शयति [illegible] मुक्तमपि [illegible] मातापूयते [illegible] चतुर्भुजस्य फलानयने सू
त्रं ॥ अस्मिंस्तु कर्णो न यतः [illegible] तयोः फलैक्यं फलमत्र [illegible] । कर्णोनयतः कर्णस्य स्वयोर्द्वयोः
। [illegible] त्र्यस्रे तुल्यादिने । तयोस्त्र्यस्रयोः फलैक्यं [illegible] चतुर्भुजे [illegible] निश्चितं फलं नवतीत्यर्थः ॥
[illegible] नयने । त्र्यस्रयोर्न्यासः ॥





लंबगुणं भूम्यर्धमित्यादिना भूमिः ७७/२ लंबः १४
यु अनेन गु २४/७७ णितेजाते [illegible] तत्केन [illegible] २२४ इदं लघुक्षेत्रफलं ॥ द्विती
यस्य भूः ७७/२ ७७ अर्धे ७७/२ लंबः ६० [illegible] तेन गुणिते ६०/७७ जाते [illegible]/२ तत्केन [illegible] २३१०
इदं क्षेत्रफ [illegible] लंब [illegible] ९२४/२३१० योगे जातं [illegible] चतुर्भु ७७/२ जे फ [illegible] लं प्रकल्प्य । सर्व
[illegible] त्रिभ्यादि सूत्रेण फलमानी [illegible] यदन्यद्वस्तु ॥ [illegible] त्रं । तदेव रुक्षोक्तं ॥ समन
लंबस्य चतुर्भुजस्य मुखोनभूमिं परिकल्प्य भूमिं ॥ भुजौ भुजौ अत्र तदेव साध्ये तस्यावधे ॥१६॥
बाधितिः स्वतस्तु ॥ आबाधयोनां चतुरस्रभूमिस्तल्लंबवर्गौक्यपदं श्रुतिः स्यात् ॥ समानलंबेल
घुदोः कुयोगान्मुखोन्यदोः संयुतिः [illegible] स्यात् ॥ चतुर्भुजस्य क्षेत्रस्य चतुरस्रस्य समानलंब
स्य । समाने तुल्ये लंबे यस्य तत्तत्प्राप्त लंबं तस्य समानलंबस्य

भूमिं धरां मुखोनभूमिं मुखेन ऊनां ईना भूमिः मुखोनभूमिस्तां मुखोनभूमिं । एवं मुखोनभू
मिं धरां प्रकल्प्य भुजौ भुजावेव चतुरस्रस्यैव । ततो नंतरं त्र्यस्रवत् त्रिभुजे भुजयोर्योगहत्या
दिना अवधे साध्ये । ततः लंबमिति [illegible] प्रमाणं आबाधी यत्सर्वं । चतुरस्रधरां क्रमशो लघु
मुखां [illegible] शोध्य शेषाः क्रमशोऽत्र त्र्यस्रे भूमिं प्रकल्प्य । भुजौ तावेव चतुरस्रस्य । एवं त्रिभुजं प्रकल्प्य
ये दित्यर्थः । आबाधयोने त्यादि ॥ इष्टकर्णे त्रिषष्टिमिते कल्पिते त्र्यस्रद्वयं जातं इमौ कर्णमितां भू
भूमिं प्रकल्प्य क्षेत्रयोर्न्यासः





क्रमेणाबाधा लंबानयनं ॥ त्रिभुजे भुजयो
र्योगइत्यादिसूत्रेण । भुजः २५ द्वितीयभुजः ५२ अनयोर्योगः ७७ अंतरं २७ ॥
अनेन २७/७७ गुणिते जातं २०७९ भूमौ ६३ अनया २०७९/६३ हृते लब्धं ३३ द्विस्थाने
६३ । ६३ ऊना ३० युता ९६ अनयोरर्धे १५ । ४८ इमे आबाधे । अथ लंबानयनं । आ
बाधा १५ कृतिः २२५ भुज २५ कृतिः जाता ६२५ अंतरं ४०० अस्य मूलं २० अयं लंबः ॥ द्वितीयस्या
पि अयमेव । लब्धाबाधा लंबमितयः । क्षेत्रयोर्दर्शनं



चतुरस्रे लंबाबाध
योर्दर्शनं



द्वितीयकर्णानयनं । आबाधे योरेक कुमुक्ष्मया [illegible]
[illegible] त्यादिना एकदिक् संस्थे आबाधे १५ । ४८ [illegible] अं
तरं ३० [illegible] लंबौ २० । ३६ योग ५६ वर्गं ३१३६ अंतवर्गं ० युतिर्देव ३१३६ अस्य मू
लं ५६ अयं द्वितीयकर्णः । अस्य चतुर्भुजस्य क्षेत्रफलं त्र्यस्रद्वयमुत्पाद्
तं तयोः फले । लंबगुणं भूम्यर्धमित्यादिना [illegible] १५० । ७३४ [illegible] जातं ७६४ इदं क्षेत्रफलं ।
अस्मिन्नेव क्षेत्रे अपरं षट्पंचाशन्मिस्थाने त्रिंशन्मितं कर्णं प्रकल्प्य द्वितीयक

र्णानयनार्थं क्षेत्रन्यासः। कर्णलंबयोः अल्पमुखलघुभुजयोर्वैपरीत्यकृते न्यासः। इति त्र्यस्त्रद्वयं जातं। कर्णमिता भूमिं प्रकल्प्य क्षेत्रयोर्न्यासः।


त्रिभुजे


भुजयोर्योग इति सूत्रेण भुजौ २५। ३९ योगः ६४ अंतरं १४ अनेन गुणिते जातं ८९६। भूभाजिते ८९६/३२ लब्धं २८। द्विष्ठा ३२। ३२ ऊनाः ४। युता ६० अर्द्धे २। ३० इमे आबाधे। अथ लंबानयनं। आबाधा २ वर्गः ४ भुजः २५ वर्गः ६२५ अंतरं ६२१ अस्य करणीगतो लंबः। द्वितीयक्षेत्रे पिलंबानयनं। आबाधा वर्गः भुजः ५२ वर्गः २७०४ अंतरं २७०० अयमपि करणीगतो लंबः। द्वितीयकर्णानयने वर्गेण महति छेदेनेत्यादिना ६२१। २७०० अनयोर्मूले जाते २४ २३/२५ । ५१ २४/२५ इमौ लंबौ सवर्णितौ जातौ ६२३/२५ । १२९९/२५ छेदसादृश्यापादनौ जातौ। १२२५/२५ वर्गः ३६२८०/६२५ सवर्णौ ... केनमहछेदमादृश्येकृते जातं ४९०००० । ३१९४०९४ पुनो जातं ३१९४०९४ अस्य आसन्नमूलं २०४५५० नक्रे लब्धो द्वितीय ६२५ कर्णः ६२५ । २०९६४/२५ । १८ २९/५० लंब ६२५ गुणान्न्यूनमर्धमित्यादिना २५०० क्षेत्रयोः फले ९९९९/२५ । ३०९५२/२५ केलब्धं निकटं २३० इदमेव क्षेत्रे भुजपरावर्तेन स्थाप्य २५ ते


इष्टे त्रिघ्ने मितिकाप्तिते त्र्यस्त्रद्वयं जातं। तयोः कर्णमितिर्भूमिर्द्वयोर्न्यासः

द्वि


तीयं केवलं क्षेत्रं त्रिभुजे भुजयोर्योगेत्यादिना लब्धे आबाधे १५। ९८। अथ लंबसाधनं। आबाधा २५ लब्धा वर्गः २२५ भुजः २५ वर्गः ६२५ अंतरं ४०० अस्य मूलं २०। इदं द्वितीयक्षेत्रे इष्टे

२०९६४/२५ भुजः ५२

लंबः ३६ इत्थं ते


आबाधयोरंतरं ३३ वर्गः १०८९ लंबौ २०। ३६ योगः ५६ वर्गः ३१३६ सर्वैक्ययोर्योगे जातं ४२२५ अस्य मूलं ६५ अयमपरो कर्णः। लंबगुणं भूम्यर्द्धमित्यादिना क्षेत्रफलं ७६४ एतदेव क्षेत्रफलं सम्यक् स्पष्टं चेत्। तत्र मुखे न भूमिं परिकल्प्य भूमिं इत्या द्विलंबाबाधार्थं न्यासः।

त्रिभुजे भुजयोर्योग इत्यादिना लब्धे आबाधे ३/५ । १७२/५ आबाधा ३/५ वर्गः ९/२५ भुजः ३९ वर्गः १५२१ छेदसादृश्ये जातं ३८०२५/२५ ९ पातिते जातं ३८०१६/२५ आसन्नमूलार्थं वर्गेण महतेत्यादिना पंचविंशत्या २५ ते ३८०१६/२५ जातं ९५०४०० अस्य तद्घ्नः ९५०४०००००० मूलं ३०८२८ छेदगुणेन नवं २५ गतमूलेन भक्ते २५ ३०८२८ लब्धं ३० शेषं ५०६८/२५०० चतु २५ त्रिशपवर्तिते ३८ एकत्र अवलंबः कर्णानयने॥ २५०० आबाधा ३/५ च अस्त्र भूमिः ६० छेदसादृश्ये ३०० सवर्णे पातिते २९७ अस्य वर्गः ८८२०९/२५ लंबवर्गः ३८०१६/२५ युतो जातं १२६२२५/२५ पंच विंशत्यापवर्तिते ५०४९ अयं कर्णवर्गः॥ भूमिः ६० आबाधा १७२/५ छेदसादृश्यापादना १२८/५ वर्गः १६३८४/२५ लंबवर्गः ३८०१६/२५ युतो ५४४०० पंचविंशत्यापवर्तिते जातं २१७६ अयं द्वितीय कर्णवर्गः। अनयोरासन्नमूलकरणे कर्णौ २५००। ४०० का स्मितौ। अनयापवर्तिते जातौ कर्णौ ७१ २/५ । ६९ २/५ ... स्मितौ मसांता विह्व वर्गो २५००। ४०० कास्मितौ। अनयापवर्तित्वा जातौ कर्णौ ४६/२० । ९१/५० फलार्थं विंशत्याऽमितो चतुरस्रं कृत्वा अपरं त्र्यस्रं विधाय तयोः फलैक्यं तत्क्षेत्रफलं तद्यथा। एको नवत्या द्विरा ... कर्मायातचतुरस्रं कृत्वा अपरं त्र्यस्रं विधाय तयोः फलैक्यं तत्क्षेत्रफलं। कोटिं तथा पंचविंशतिप्रमाणं भुजं प्रकल्प्य ३९। २५ कोटिभुजघातेकृते जातं ९७५ इदं चतुरस्रस्यत्रिभुज

कल्पिता। एकोनचत्वारिंशन्मितः एको भुजः। द्विपंचाशन्मितोऽपरो भुजः। पंचत्रिंशन्मिता धरा। एवं त्रिभु
जे प्रकल्प्य। सर्वदोर्युतिदलमित्यादिसूत्रेण फलं ॥ १८२ २१ ५० सर्वचतुरस्रफले योजिते जातं १५५४। इदमासं
न्नफलं। अथवा लंबेन निघ्नं कुमुखैक्यखंडं इत्यादिना फलं तदेव १५५४। एवं चतुरस्रे क्षि
प्तेषु बाहुषु अन्यावन्यो कर्णौ तु साध्येते ॥ एवमनियतत्वेऽपि बाहुषु साधितौ नियतौ कर्णावानी
तौ। तदानयने करणसूत्रं ॥ तु...मितभुजघाते तुल्यं यथा ... तं गुणयेत् ॥ योगेन भुजप्र
तिभुजवधयोः कर्णौ पदे स्तः ... कर्णसंश्लिष्टभुजौ कर्णे श्लिष्टभुजौ। योघातः परस्परं हननं
तिभुजवधयोः ... परस्परं ॥ कोऽर्थः। एक
॥ तत्र यथा द्वितीयः ... भाजनीयमित्यर्थः ॥ भुजप्रतिभुजवधयोरन्त्यादिमुखभुजवधयोर्य
स्य कर्णे श्लिष्टभुजः ... ॥ तयोः पदे मूले विषमे चतुरस्रे कर्णौ भवतः ॥ कानि पूर्वोक्तन्यासः ॥
गेन ते ... गुणयेत् ॥ हन्यात् ॥ तयोः ... भुजौ ५२। ६० वधे २५ ३९ जाते २७५ अत्र ... १५२० गुणि
एकस्य कर्णस्य कर्णश्लिष्टौ भुजौ २५। ३९ द्वितीयस्य कर्णश्लिष्टौ भुजौ ५२। ६० वधे ... ४०९५ द्वितीयक ... र्ण
ते जाते ३१२० योगे ३१२० २७५ जातं ~~...~~ ४०९५ ... ३९१५०२ घाते २५ ६० ३९ गुणितो जातो १५०० २३४० योगे २३४० १५०० जातं ३८४० ॥
मितौ भुजौ २५। ५२ ... पंचपंचाशदधिकशतं ... तच्चतुर्भिर्हृतं
अपमांसभागार्थं न्यासोऽयम् ॥ ४०९५ ३८४० ... ॥ २ ॥ ४०९५ ३९१५०२५ अनयोर्घातः ५२ ३९ वधे २०२८ ६० २५
वर्तितेर्जातो ८ ... भुजप्रतिभु ३८४० ... गे ३५२८ अनेन ... ३५२८ गुणितौ जातौ ३९७५ ... १८२२४ ... ७ ... अनेन स्वस्व
हते १५०० वा ॥१७८॥
हृते जाते ३९३२१। ३२३५१ अनयोर्मूले ६३। ५६। इमौ कर्णौ चतुरस्रस्य ॥ अस्य कर्णानयनस्य प्रक्रियागौ
रवं लघुप्रक्रियया ग्रन्थकारः भास्कराचार्योऽनयोरेव कर्णयोरानयनमाह ॥ क

रणसूत्रं ॥ अभीष्टजात्यद्वयबाहुकोट्यः परस्परं कर्णहता भुजा इति। चतुर्भुजं द्विषमं प्रक
ल्पितं ... भुजा द्वयानतः। बाहुकोटिवधः कोटिवधेन युक्तः स्यादेकाकृतिः कोटिवधाद्भुजैक्यं ॥
अन्यात् लघौ सत्यपि साधनेऽस्मिन् सर्वैः कृतं यद्गुरुतं न विद्मः। अभीष्टं कल्पितं जात्यद्वयं
अभीष्टजात्यद्वयं। तयोर्बाहुकोटयः ॥ भुजलंबाः परस्परं अन्योन्यं कर्णहताः। कृतिगुणिताः
संतः यद्विषमं चतुर्भुजं कल्पितं स्युः विषमं ॥ तत्र भुजा बाहवो भवंति। तस्तेन तस्मात्त्रिभुजद्व
यात्। तत्र चतुर्भुजे कानि कर्णौ भवतः। तु पुनरर्थे ॥ बाहुकोटिवधः भुजयोर्घातः कोटिवधेन युक्तः
युक्तः सन् एका कृतिर्भवति कोटिभुजावधे स्यात् कोटिः भुजा कोटिभुजौ तयोर्वधः कोटिभुज
वधस्तस्यैक्यं ॥ अन्या द्वितीया कृतिर्भवति। द्वितीयः कर्णो भवतीत्यर्थः ॥ अस्मिन् लघौ साधने
लघुके सत्यपि विद्यमानेऽपि सर्वैः सर्वाचार्यैर्यद्गुरुसाधनं घनतरसाधनं कृतं प्रक्रियागौरवं
कृतं तद्धायित्वं मनिध्र्व...यं तन्न जानीमः। जात्यद्वयस्य न्यासः ॥ भुजकोटिकर्ण
... कृतं ... भुजः। कोटिः ३ कर्णः १३ ... ४ घाते ५२ इमे च
घातः बाहुः १२ कोटिः ५ घाते ६० अयमेको भुजः। कोटि ३ कर्ण १३ ... भुजः ४ घाते ५२ इमे च
घातः बाहुः १२ कोटिः ५ घाते ६० ... तेषां मध्ये ... लघुपंचविंशतिप्रमाणं मुखं ॥ ...
त्वारश्चतुर्भुजाः कल्प्यंते। तेषां ... ॥ कर्णानयनं। कोटिः बाहु १२ द्विबाहु ४ घाते ४८
न्योवामदक्षिणप्रदक्षगतौ भुजौ। दर्शनं  अत्र कर्णे भुजः १२ कोटि ३ घाते ३६ कोटि ५
कोटि ५। द्विकोटि ३ घाते १५ उभयोर्योगे ६३ ४ घाते २० उभये घाते ६५ अयं कर्णः सिद्धिः ॥
भुजः ~~...~~ ... नियतमतो नाद्रियते हर्वाचार्यैस्त्रिभिः ३३ प्र
कर्णयोरनियतिक्षेत्रस्याप्यमितत्वात् द्वृदयमप्यनियतमतो नादृतो ... तयोः प्रमाणमनुसत्यहृदयर
द्विपंचाशन्मितौ कर्णौ कल्पितौ। तयोः प्रमाणमनुसत्यहृदयर

ऽस्यानयनं। भुजः ७७ वर्गः ५९२९ प्रतिभुजः ५२ वर्गः २७०४ तयोर्योगः ८६२५ मूलं ९५ अर्धं ३२ इयं द्वयर
ज्जुप्रमाणं। अथो भुजः ६० वर्गः ३६०० प्रतिभुज २५ वर्गः ६२५ योगः ४२२५ मूलं ६५ अर्धं ६५।२
तद्वदपरोदाहरणं। क्षेत्रे यत्र शतत्रयं क्षितिमितिस्तत्र त्वेकतुल्यं मुखं। बाहू द्वे कृतिभिः शता
ति धृतिभिस्तुल्यौ च तत्र श्रुती। एका खाश्वयमैः समानितिथि भुजौ च न्याय लंबको तुर्मगो धृ
तिभिस्तथा जिनयमैर्योगश्च वो लंबयोः॥ तत्र खंडे कथयाधरे भवतयोर्योगस्त्वं नावधा
स्तस्सूची निजमार्गवृद्धभुजयोर्योगेन यस्मात्ततः। साबाधं ततयं बकं च भुजयोः सूच्याः प्र
माणं च के सर्वगाणितकप्रपञ्चकुशलनितरां क्षेत्रे इदृक्षोऽसि चेत्॥ यत्र यत्र क्षितिमितिर्भूमानं
शतत्रयं त्रीणि शतानि मुखं वदनं तत्वैकतुल्यं तानि पंचविंशतिः इदुरेकः पंचविंशत्यधि
कशतप्रमाणं। बाहू भुजौ द्वौ कृतिभिः शताति धृतिभिस्तुल्यौ। खं शून्यं कृतिः विंशति
शतिः। एको भुजः षष्ट्यधिकशतद्वयप्रमाणः। शरपंच अतिधृतिरेकोनविंशतिः अपरो भु
जः पंचनवत्यधिकशतप्रमाणः॥ तत्र क्षेत्रे एकाश्रुतिः खाश्वयमैः समा। खं च अश्व सप्त यमौ च ख
श्वयमाः तैः खाश्वयमैस्तुल्या समा। अशीत्यधिकशतद्वयप्रमाणा॥ अन्या अपराश्रुतिस्तिथि
गुणैः समा॥ तिथयः पंचदश। गुणास्त्रयः। तैस्तुल्या पंचदशाधिकशतत्रयप्रमाणा। तत्र लंबकौ
तस्मिन्क्षेत्रे स्यातां यो गो धृतिजिनौ धृतिरष्टादश जिनयमैः जिनाश्चतुर्विंशतिः यमौ द्वौ ताभ्यां ॥७५॥
धृतिभिः जिनयमैस्तुल्यौ॥ एको लंबः नवाशीत्यधिकशतैकप्रमाणः॥ अपरश्चतुर्विंशत्यधिकशता
नद्वयप्रमाण इत्यर्थः॥ अवोलंबयोर्योगात् कृतितं बसंयोगात्॥ अधरे अधोभागस्थिते
तत्खंडे कथय। अवलंबयोर्योगात् अधःस्थितखंडे द्वे कथय। अवलंबयोगात् कांचि

ते लंबाबाधा। लंबेन च अवधे च ते आबाधाः कथय। च समुच्चये। निजमार्गवृद्धभुजयोः। स्वमार्गे
ण वृद्धौ भुजौ निजमार्गवृद्धौ भुजौ तयो निजमार्गवृद्धभुजयोर्योगाकृतेः या सूची स्यात् तां कथय॥ त
तोऽनंतरं सूच्याः साबाधं आबाधारहितं लंबकं मध्यलंबकं कथय॥ भुजयोः केप्रमाणे नवत इदे
गणितकगणितकलाकुशल इदं सर्वं प्रपञ्चवत्कथय॥ अत्र क्षेत्रे नितरां अतिशयेन चेद्यदि
दक्षोऽसि। स्तत्रस्य॥ मोत्रवसि। भूमानं ३०० मुखं १२५ बाहू २६०।१९५। लंबौ २५२।१८९ ले
त्रस्य न्यासः



अत्र करणसूत्रम्॥ लंबतदाश्रितबाहोर्मध्यं संध्याख्यम स्य लंबस्य॥ संधेरूनाभूः पीठं साध्यं यस्याधरखंडं॥ तत्संधिपरलंब
श्रवणाभिः। श्रवणा भिहितः परस्य पीठेन तत्कोलंबस्य स्याद्योगा स्यातामधर
खंडे॥ लंबतदाश्रितबाहुमध्ये लंबतदाश्रितबाहू। तयोर्लंबत
दाश्रितबाह्वोः मध्यं अंतरं प्रदेशः। स्य लंबस्य संध्याख्यं संधि नाम।
भूः धरा संधेरूना संधेरूना भूः संधि ऊना भूः पीठं पीठमिति संज्ञा। शेषधराद्
त्यर्थः॥ यस्य लंबस्य कर्णस्य वा। अधरे लंबकर्णयोर्योगादधरस्थिते खंडे साध्यं साधनीयं
भवति॥ तत्संधिस्तस्य लंबस्य संधिः परलंबो द्वितीयस्तल्लंबः। तथा श्रवणेन कर्णे
न अभिहितोऽपि तः सन् परपीठेन हृतो तत्कोऽसन् लंबकस्त्वो योगादधः खंडे जयतः। को
ऽर्थः। यदा संधिपरलंबेन हत्वा परपीठेन भज्यते तदा लंबाधः खंडं लभ्यते। यदा संधिः श्रवणेन
हत्वा परपीठेन भज्यते तदा कर्णाधः खंडं लभ्यत इत्यर्थः॥ यत्क्षेत्रे लंबो बाश्रित इत्यनेन सूत्रेण लंबः १८९
तदाश्रितबाहुः १९५। अनयोर्वर्गौ। लंबवर्गः ३५७२१ बाहुवर्गः ३८०२५। अंतरं २३०४ अस्य मूलं ४८ सं

ॐ॥ धिसंज्ञा। बाकुः २६० लंबः २२४ लंबवर्गः ५०१७६ बाकुवर्गः ६७६०० अनयोर्विश्लेषः १७४२४ अस्य
मूलं १३२ अयं संधिः। अनेनोना भूः १६८ अस्य पीठमिति संज्ञा। अथ लंबाधःखंडसाधनं। लंबः १८ अस्य
संधिः ४८ परस्तंभ उन्नतः परपीठं त्र क्षेत्रे लंबः २२४ संधिः ४८ पीठं १६८ भाज्यभाजकौ चतुर्विंशत्यापवर्तितौ
२२४।२।७। गुणहारौ समसंज्ञिः समाना संप्रमार्जितौ चतुर्विंशत्यधिकशतद्वयस्य समसंख्याकत्वात् ३२।२।१। द्वात्रिं
शता हते ६४ इदं लंबाधःखंडं। त्रैराशिकं॥ यद्यष्टषष्ट्यधिकशतेन न्यूनखंडेन चतुर्विंशत्यधि
कशतद्वयोर्लंबस्तदा चत्वारिंशन्मितया संधिन्यूनतया ऽवधया कियान् लंब इति॥ न्यासः १६८।२२४
१।४८। भाज्यहारौ चतुर्विंशत्यापवर्त्य ७।२२४।२। ततो भाज्यभाजकौ। ततो भाज्यभाजकौ सप्तभिरपवर्ति
तौ जातौ १।३२।१। हतेन क्षेत्रे लंबाधःखंडं ६४। कर्णाधःखंडं साध्यते॥ संधिः ४८ कर्णः २८० पीठं १६८ भा
ज्यभाजकौ चतुर्विंशत्यापवर्त्य गुणहारौ सप्तभिस्सप्तभिरपवर्तितौ २।४०॥ गुणितेन क्षेत्रे चलसंधि
कर्णाधःखंडं ८०। त्रैराशिकं यथा। यद्यष्टषष्ट्यधिकशतेन पीठन्यूनेन न्यूनखंडेनाशीत्यधिकशतद्वय
मितः कर्णः। तदाष्टचत्वारिंशन्मितेन संधिन्यूनेनावधाखंडेन कियान्कर्ण इति॥ न्यासः॥ १६८।२८०
४८। प्राग्वदपवर्तिते १।४०।२। इच्छाहते प्रमाणभक्ते लब्धं कर्णाधःखंडं ८०। द्वितीयलंबाधःखं
डानयने॥ संधिः १३२ लंबः १८९ परपीठं २५२ गुणहारौ त्रिषष्ट्यापवर्तितौ। नवाशीत्यधिकशतस्य त्रिष
ष्टितमो भागो ३ द्वापंचाशदधिकशतद्वयस्य त्रिषष्टितमो भागो ४ चतुर्द्वात्रिंशदधिकशतस्य चतुर्थांशो ३३ उ
हते लब्धं लंबाधःखंडं ९९। त्रैराशिकं। यदि द्विपंचाशदधिकशतद्वयेन पीठन्यूनेन न्यूनखंडेन ॥८०॥
नवाशीत्यधिकशतमितो लंबस्तदा द्वात्रिंशदधिकशतमितेन संधिनाऽवधाखंडेन किया
न्लंब इति॥ न्यासः। २५२।१८९।१३२। भाज्यभाजकौ त्रिषष्ट्यापवर्तिते ४।३।१३२। चतुर्भिश्चतुर्थां

हनि ३ | नबा ३३ | नल १

शे १ द्वात्रिंशदधिकशतस्य चतुर्थांशो ३३ इति कृते जाते १।३।३३ इच्छाहते प्रमाणभक्ते जातं ९९॥
इदं कर्णाधःखंडं। अनुपातेन प्रत्ययः कार्यः। यदि द्वापंचाशदधिकशतद्वयमितेन न्यूनखंडेन
पीठनाम्ना पंचदशाधिकशतत्रयपरिमितः कर्णस्तदा द्वात्रिंशदधिकशतमितेन संधि
नाम्नावधाखंडेन कियान्कर्ण इति न्यासः। २५२।३१५।१३२। भाज्यभाजकौ त्रिषष्ट्यापवर्त्य गु
णहारौ ४।५।१३२। गुणहारौ चतुर्भिरपवर्तितौ जातौ १।३३।५। इच्छाहते प्रमाणभक्ते चलखंडं क
र्णाधस्तनं खंडं १६५। कर्णयोगाद्या बाधा लंबज्ञानार्थं सूत्रं॥ लंबौ भूघ्नौ निजनिजपीठविभक्तौ च
वंशौ स्तः। तन्मार्गेण वधश्च सो योगे छिन्नाः खंडेन॥ लंबौ भूघ्नौ भूगुणितौ। निज निजपीठ
विभक्तौ स्वस्वाबाधाघ्नौ लब्धौ वंशौ जायेते। तत्र पूर्वोदाहरणे प्राग्वत्। अन्योन्यमूलाग्र
गसूत्रयोगादित्येनानीतो लंबः साध्यः। ऊर्ध्वखंडन्यूनखंडे साध्ये। लंबः १८० भूः ३०० निजपीठं
२५२ भाज्यभाजकसमायाज्याशीत्यधिकशतस्य त्रिषष्टितमो भागो ३ द्वापंचाशदधिकशत
द्वयस्य त्रिषष्टितमो भागो ४ चतुर्लब्धं चतुर्थांशो शतत्रयस्य चतुर्थांशो ७५ इति कृते जातं ७५ २
हतेन क्षेत्रे चलखंडो वंशः २२५। द्वितीयो लंबः २२४ भूः ३०० निजपीठं १६८ न्यूनपीठं द्वादशभि
रपवर्तितौ लंबपीठे द्वादशभिरपवर्तिते इति जातं २५ | हतेन क्षेत्रे चलखंडो द्वितीयो वंशः ४००
अन्योन्यमूलाग्रग इत्यादिना वंशौ २२५।४००। अनयो र्वधे इत्यादिना प्रमाणगुण
क्षो जातो। वंशयोर्योगः ६२५। अयं हारः। भाज्यभाजकौ शतचतुष्टयस्य पंचविंशतितमो १६ पं
चविंशत्यधिकशतषट्कस्य पंचविंशतितमो २५। अस्य स्वांशो ९ पंचविंशत्यधिकशतद्वयस्य

पंचविंशतिनमित्रो २ इतिकृते जातं ८ । इतेनक्के च घ्नो लंबः १६८ भूखंडानयने भूः ३०० । वंशौ २२५ ।
।५०० वंशयोगः ६२५ वंशोनघ्नो । ९ । वंशयोगनक्को ३०० । ३०० भाज्यभाजकौ पंचविंशत्याप
वर्त्यततो गुणहारौ पंचविंशत्यापवर्त्तितौ ४०० । ४०० ६२५ । ६२५ जातौ १२ । १२ इतेनक्के च लब्धे
भूखंडे १०८ । १९२ । आभ्यां भूखंडाभ्यां लंबस्य त्रैराशिकेन ८ । ९ प्रत्ययः । यदि त्र
तत्र यमित याभूम्या पंचविंशत्यधिकशतत्रयमितो वंशस्तदा षधिनवत्यधिकशतेन के नकि
यान्लंबः ३०० । २२५ । १९२ प्रमाणेच्छा हादत्रा त्रिरपवर्त्य पुनः प्रमाणफले पंचविंशत्यापव
र्त्तिते १ । ९ । १९ । इच्छाहते प्रमाणभक्ते जातो लंबः १४४ द्वितीयेनाबाधाखंडेनानुपातः ३०० ।
४०० । १०८ । एवं वितूलनेलंबः स एव । अथ सूचीलंबाबाधा भुजज्ञानार्थं सूत्रं । लंबहतो
निजसंधिः परलंबयुताः समाकृयोज्ञेयः । समपरसंध्योरैक्यं हारस्तेनोधृतौ तौ च । समपर
संधी लघ्नौ स्याबाधे पृथक् स्यातां ॥ हारहृतः परलंबः सूचीलंबो परे लघ्नौ ॥ सूचीलंब
घ्नौ भुजौ निजनिजलंबौ धृतौ भुजौ स्याः । एवं क्षेत्रक्षोदः प्राज्ञैरैराशिकाद्वज्ञेयः ॥ निजसंधिः
स्वकीयसंधिः परलंबगुणः परलंबहतः । स्वलंबनक्कः समाकृयः समसंज्ञो ज्ञेयः ॥ वेदितव्यः ॥
समपरसंधीः । समः परसंधिश्च सममपरसंधी तयोः समपरसंध्योः ऐक्यं योगः । हारः हार
संज्ञः । तेन हारेण समपरसंधि पृथग्धृतौ नक्कौ भूघ्नौ भुजाहतौ स्याबाधे सूचीभूखंडे स्या
तां । भवतः ॥ परलंबो ऽन्यलंबः हारहृतः हारनक्को भूघ्नो भुजागुणितः सूचीलंबो भवेत् ॥ सूची ॥ ८१ ॥

लंबघ्नभुजौ । सूचीलंबेनघ्नौ गुणितौ भुजौ सूचीलंबघ्नभुजौ ॥ निजनिजलंबो धृतौ स्वस्वलं
बनक्कौ सूची~~लंबौ~~ भुजौ स्तः सूचीबाहू भवतः ॥ प्राज्ञैर्विद्वद्भिरेवमनुनाप्रकारेण
क्षेत्रक्षोदः क्षेत्रनिश्चयस्त्रैराशिकात् ज्ञेयो वेदितव्यः ॥ त्रैराशिकप्रत्यया प्रत्ययकरणीय
इत्यर्थः ॥ लंबः २२४ अस्य संधिः १३२ परलंबः १८९ गुणनजने १८९ गुणहारौ सहा त्रिर
पवर्त्तितौ २१ । ३२ भाज्यहारौ चतुस्त्रिरपवर्त्तितौ २१ । ३३ गुणितंजा ३३ । २२४ तं ८९ । ८ अयं सम
संज्ञः अस्य ३३ । ३२ समसंज्ञस्य परसंधिनासह योगा थर्म सः ८ । ८९ । ५८ । ९ अस्य
स्तंभस्य ... छेदाभ्यां छेदसाद्रूप ८९ । ८ । ३५४ । ८ योगे १२९५ अयं हारसंज्ञः ८ । ९ अ
यस्मिन् ८ तेन ८९ । ८ । १२९५ । ५८ । ९ । ८ । १२९५
नेन समपरसंधिनक्कौ छेदांशविप सर्वेषां त्रिस्त्रिरपवर्त्तिते ८९ । ८
समराशिराशेरपवर्त्यापवर्त्ते छेदगनाः भूः ३०० अनयागुणितो ३०० गुणकभाजकौ
२८७ । १११ । ८ । ४२५ । १ । ४२५ अथ छेदांशविदुनाः २८७ । १२८ । ४२५ । ४२५ तो १२ । १२ इतोजाते ॥ १२८ । ४२५ । ५४८ । १९ । १५३६ । १९
पंचविंशत्यापवर्त्त्य २८७ । १९ । १२८ । १९ परलंबगुणः २२४ । ५८ गुणहारौ सप्तभि
इयं स्याबाधे । अथवा संधिः ४८ । निजलंबः १८५ गता अयं स्च यदि नवाशीत्यधि
रपवर्त्य जाते ३२ । ५८ । २१ भाज्यहारौ त्रिस्त्रिरपवर्त्य ३२ । १६ । २ गुणिते नप्रमा २२४ । ५८ । १८८ लो भुजस्तदा अनेन स्चचि मितेभ
कशतमितेन लंबेन पंचनवत्यधिकशत दे नवाशीत्याधिकपंचशतेनापव
नकि मिति मा ॥ यथा ॥ २८८ । १ । १९५ । १ । ६०८ । १९ प्रमाणेच्छे
र्त्तितेजाते १ । १९५ । २ । ३२ । २१ गुणिते एकेन नक्कौ च जातो भुजः ६२८० । १९ द्वितीयभुजस्य

त्रैराशिकं। यदि चतुर्विंशत्यधिकशतद्वयमितेन लंबेन षष्ट्यधिकशतद्वयप्रमाणो भुजः। तदा नवत्या सार्धचत्वारिंशता लंबेन कियान्भुजः इति। न्यासः। २२४। २६०। १०८ प्रमाणेच्छे चतुर्विंशत्यधिकशतद्वयेनापवर्तिते १। २६०। २७ इच्छाहते प्रमाण १ भक्ते च जातो भुजः ७०२० अस्य हृद्या नयने भुजः॥ ३०० प्रतिभुजः १२५। अनयो वर्गौ ९०००० १५६२५ मूलं ३२५। अर्धं ३२५ अथवा भुजः १२५। प्रतिभुजः २६०। अनयोः कृती। १५६२५। ६७६०० योगः १०५१२५ मूलं ३२५। अर्धं १६२ एवं सर्वत्र भागहारत्रैराशिकप्रमाणानुरूपयुक्तिभ्यः यथा योग्यं फलं छेद प्रकल्प्य सुधिया त्रैराशिकं तु २ ह्यं॥ क्षेत्रदर्शनं॥ व्यासे भनंदाग्निहते विभक्ते खबाणसूर्यैः परिधिस्तु सूक्ष्मः॥ द्वाविंशतिघ्ने विहृतेथ शैलैः स्थूलोथवा स्याद्व्यवहारयोग्यः॥ व्यासे क्षेत्रस्य विस्तारेभनंदाग्निहते भानि च नंदाश्च अग्नयश्च भनंदाग्नयस्तैर्हते भनंदाग्निहते भानि नक्षत्राणि सप्तविंशतिः नंदा नव। अग्नय





॥८२॥

स्त्रयो दक्षिणाग्निगार्हपत्याहवनीयाः इति कोर्थः॥ सप्तविंशत्यधिके शोनचत्वारिंशच्छतैर्गुणितेइत्यर्थः॥ विभक्ते हृते कृतेकैः खबाणसूर्यैः खे च बाणाश्च सूर्याश्च खबाणसूर्याः तैः खबाणसूर्यैः खं शून्यं बाणाः पंच। सूर्याः द्वादश। पंचशदधिकद्वादशशतैर्भाजितेइत्यर्थः॥ सुस्पष्टो गतिस्फुटः परिधिः परिणाहो भवतीत्यर्थः इति॥ अथवा व्यासे द्वाविंशत्याहते शैलैः सप्तभिर्विहृते भक्ते स्थूलो व्यवहारयोग्यः प्रवर्तकोभवति॥ उदाहरणं॥ विष्कंभमानं किल सप्त यत्र तत्र प्रमाणं परिधेः प्रचक्ष्व॥ द्वाविंशतिर्यत्परिधिप्रमाणं तद्व्याससंख्यां च सखे विचिंत्य॥ किल इति संभावनायां॥ यत्र क्षेत्रे विष्कंभमानं व्यासप्रमाणं सप्त॥ सप्तसंख्यं। तत्र क्षेत्रे परिधेः परिणाहस्य प्रमाणं चिंतयित्वा कथय इति॥ न्यासः। ७। भनंदाग्नि ३९२७॥ अनेन हते जाते २७४८९ खबाणसूर्यैर्विभक्ते २७४८९ / १२५० लब्धं परिमाणं २१ १३९ / १२५० अथवा न्यासः। ७ द्वाविंशतिहते २२ / ७ जातं १५४ शैलैः ७ भक्ते लब्धं २२ इदं व्यवहारेण खबाणसूर्यैर्गुणितं १२५० जातं लब्धं परिधेर्मानं २७५०० सवर्ण॥ व्यासानयनं॥ परिधिः २२ भनंदाग्निभक्ते २७५०० / ३९२७ लब्धं व्यासमानं ७ / १ इदं स्थूलमानं २२ / ७। एका दशानां वृद्धितः स्थूलत्वं॥ करणसूत्रं॥ वृत्तक्षेत्रपरिधिगुणितव्यासपादः फलं तत्॥ क्षुण्णं वेदैरुपरि परितः कंदुकस्येव जालं। गोलस्यैवं तदपि च फलं पृष्ठजं व्यासनिघ्नं षड्भिर्भक्तं भवति नियतं गोलगर्भे घनाख्यं॥ वृत्तक्षेत्रे वर्तुलक्षेत्रे व्यासपादः विस्तारचतुर्थांशः परिधिगुणितः परिणाहहतः सन् फलं क्षेत्रफलं भवति। तत्फलं वेदैः क्षुण्णं चतुर्भिर्गुणितं गोलस्य

वृत्तपाषाणस्य उपरिपरितः उपरिष्टात्परितः सर्वतः फलं गोलस्योपरिपरितः फलं भवतीत्य
र्थः॥ यथा कंदुकस्य जालं उपरिपरितो भवति॥ तदपि दृष्टजं फलं व्यासनिघ्नं विस्तारगुणितं षड्
भिर्भक्तं घ॥ इति विदितं गोलगर्भे गोलमध्यप्रदेशे घनात्मं घनहस्तात्मकं फलं भवति। उदाह
रणं॥ यद्व्यासस्तुरगैर्मितिः क्रिलक्षफलं क्षेत्रे समितत्रक्रिं॥ व्यासः सप्तमितः यस्य सुमते गोलस्य
तस्यापि किं॥ दृष्टं कंदुकजालसन्निभं फलं तस्यैव गोलस्य किं॥ मध्ये ब्रूहि घनेफलं च विमलां
चेद्विन्सि लीलावती॥ क्रिलसं भावनायां॥ यद्व्यासः यस्य क्षेत्रस्य विस्तारः तुरगैर्मितिः सप्तह
स्तप्रमाणः॥ तत्र समे क्षेत्रे समाने भूमिप्रदेशे किं फलं क्रियत्सर्वक्षेत्रफलं स्यात्॥ हे सुमते कु
तुहू यस्य गोलस्य व्यासो विष्कंभः सप्तमितः सप्तहस्तप्रमाणः। दृष्टे दृष्टजागे कंदुकजालसंनिभ
फलं कंदुकजालेन संनिभं सदृशं फलं कंदुकजालसंनिभं फलं॥ तस्य च गोलस्य मध्ये गर्भगतं
घनफलं घनहस्तात्मकं फलं किं स्यात् ब्रूहि॥ त्वं च हे विमलधीमति लीलावती पाटिस्त्र
पावे विजानासि॥ न्यासः॥ व्यासः ७ अस्य पादः ७/४ परिधिः २१९९ / १२५० अनेन गुणिते जाते १९२४२३ / ५०००
भक्ते लब्धं ३८ इदं क्षेत्रफलं। गोलपृष्ठानयनं। इदं फलं १९२४२३ / ५००० सवर्णितं। १९२४२३ / ५००० भक्ते
वेद ४ जातं २४२३ / ५००० वेदैर्हतं गुणकभाजकन्यायात् अपवर्तनं च तुभिरपवर्त्तितं १९२४२३ / १२५० जाते १९२४२३ / १२५०
लब्धं गोलपृष्ठजं फलं १५३ / ११९३ / १२५० गोलगर्भे घनफलानयनं॥ अस्मिन्फले सवर्णितं
व्यासनिघ्नं षड्भिर्भक्तं ७/६ १२ २४२३ / १२५० भाज्यभाजकौ त्रिभिरपवर्त्तितौ ॥८३॥

तौ ७/२ १९४९६१ / १२५० गुणिते जाते ७५२९७ / २५०० भक्ते लब्धं॥ गोलमध्यघनफलं १७९ / १४९७ / २५०० प्रकारांतरेण गो
दाकरणसूत्रं॥ व्यासस्य वर्गं त्रिनवाग्निनिघ्ने सूक्ष्मफलं पंचसहस्र
भक्ते॥ रुद्राहते वाऽर्कहृते च वा स्यात्स्थूलं फलं स्याद्व्यवहारयोग्यं॥ घनीकृतव्यासदलं निजैकविं
शांशयुग्गोलफलं घनं स्यात्॥ व्यासस्य विष्कंभस्य वर्गे त्रिनवाग्निनिघ्ने सप्तविंशत्यधिकैकोनच
त्वारिंशच्छतगुणिते। पंचसहस्रभक्ते सहस्रपंचकविहृते सूक्ष्मं स्पष्टं फलं भवति। अथवा व्यासस्य
वर्गे रुद्राहते एकादशाभिर्गुणिते अर्कहृते च तुर्दशभिर्भक्ते व्यवहारयोग्यं प्रवृत्तियोग्यं स्थूलं किंचिदसंत
रं फलं स्यात् भवति॥ घनीकृतं व्यासदलं। घनीकृतो यो व्यासः घनीकृतस्य व्यासस्य दलं घनीकृतव्यासदलं
निजैकविंशांशयुक् निजः आत्मीयो यः एकविंशांशः एकविंशतितमो भागस्तेन सहितमित्यर्थः॥
गोलफलं घनात्मकं स्याद्भवति॥ उदाहरणं व्यासस्य न्यासः॥ ७। वर्गे ४९ त्रिनवाग्निहते ३९२७ जातं
१९२४२३ पंचसहस्रभक्ते १९२४२३ / ५००० लब्धं सूक्ष्मं फलं तदेव ३८ २४२३ / ५००० अथवा व्यासवर्गे ४९ ४९
रुद्राहते ११ जाते ५३९ अर्कभक्ते ५३९ / १४ लब्धं स्थूलं २४२३ / ५००० फलं ३८ घनफलानयनं॥ व्या
सः॥ ७ घ ७/२ ने ३४३ दलं ३४३ / ८ निजैकविंशांशयुक्॥ ३४३ / ८ तत २ २ छेदांशयोर्निहे
सादिति कृते जातं॥ ७५४६ / १६८ अपवर्त्तिते जातं ३७७३ / २१ भक्ते २ / २१ लब्धं घनफलं १७९ / ३ इदम
पि स्थूलं। करणसूत्रं। ज्याव्यास ४ २१ योगां २ तरघातमूलं व्यासस्तदूनो
दलितः शरः स्यात्॥ व्यासाच्छरोनाच्छरसंगुणाच्च मूलं द्विनिघ्नं भवतीह जीवा॥ जीवार्धव
र्गे शरभक्तयुक्ते व्यासप्रमाणं प्रवदंति वृत्ते॥ ज्याव्यासयोगांतर॥ मिति श्लोकार्थः॥ ज्याव्यासयोगां
तरेण ज्याव्यासयोगं हत्वा मूलं वर्गमूलं ग्राह्यमित्यर्थः॥ व्यासो विस्तारः। तदूनस्तेन मूलेनक

नोऽशुनः। दलितोऽर्धीकृतः सन् शरः स्यात्॥ बाणमाने भवति॥ व्यासात् विष्कंभात् शरो
नात् शरप्रमाणहीनात् शरसंगुणात् बाणहतात् मूलं वर्गमूलं द्विनिघ्नं द्वाभ्यां गुणितं द
इव्यासे जीवा भवति॥ प्रजीवि ना स्यात्। जीवार्धवर्गजीवायाः अर्धं जीवार्धं तस्य वर्गो
जीवार्धवर्गः॥ तस्मिन् जीवार्धवर्गे शरभक्तयुक्ते। शरेण भक्तः शरभक्तः शरभक्त
श्च युक्तश्च शरभक्तयुक्तः॥ तस्मिन् शरभक्तयुक्ते॥ कोर्थः॥ ज्यावर्गः शरेण विभज्य शरभक्त
कार्यं इत्यर्थः॥ वृत्तेवतु संक्षेत्रे तद्व्यासमाने विष्कंभप्रमाणे वदति कथयति॥ अत्रोद्देशकः॥
दशविस्तृतिवृत्तांतः तत्र ज्या षण्मितासखे॥ तत्रेषुं वद बाणज्योज्या बाणाभ्यां च विस्तृतिं
यत्र क्षेत्रे वृत्तांतः वृत्तमध्यप्रदेशः दशविस्तृति दशप्रमाणा विस्तृतिविस्तारो यस्य
तद्वृत्त। विस्तृतिः व्यासे जिनीब षण्मिता षट्प्रमाणा। हे सखे तत्रेषुं वद। बाणं कथय।
बाणात् शरात् ज्यां जीवां वद। ज्याबाणाभ्यां विस्तृतिं विष्कंभं वद व्यासः॥ ज्या ६ व्या
स १० योगे १६ अंतरं ४ अनेन हते ६४ जातं ६४ मूलं ८ व्यास १० मूलेनो नीकृतं
जाते २ दले १ इदं बाणमानं। व्यास १०। शर १ अनेन ऊनीकृते ९ शर गुणे ९
मूलं ३ द्विघ्नं ६। इयं जीवा॥ व्यासानयने॥ संजीवनी ६। ॥८४॥
एकेन भक्ते गुणिते यत् तत् देव। मूलं ३। द्विघ्नं ६। इयं जीवा॥ एकेन भक्तेन तदेव ९ शरयुक्ते जाते १० इदं विष्कंभमानं। एवं अन्यत्रापि विष्कंभे जी
अर्धं ३ वर्गः ९ एकेन भक्ते तदेव ९ शर १ युक्ते जाते १० इदं विष्कंभमानं।

जीवाबाणानां साधनेन कृत्वा विष्कंभानयने कार्यं॥ यानि कर्णकोट्युत्पादीनि क्षेत्राणि। चित्री दाहरणे
क दाहृतानि तानि वृत्तक्षेत्रसि। जिनीवासो नाद प्रपंते॥ वृत्त व्यासप्रमाणं ४० जीवामाने ३२ ज्या व्यास
योगांतरेत्यादिना लब्धं शरमाने ८ इस्त ८ व्यास समे व्यासात् शरोनादिति जीवा प्रत्ययः। उदाहरणं।
यदि समभुवि वेणुर्द्वित्रिहस्तप्रमाण इत्यादि॥ अत्र संजिनी ३२ इदं वंशमाने। शरोन व्यासः ए
वं च। मूलादंतरं च हस्ताः १६ इदं ज्यार्धवर्गः २५६ शरोन व्यासभक्ते (२५६/३२) लब्धं ८ वंशयो जि
ते जाते ४० इदं व्यासमानं। अर्धं २० अयं कर्णः। अत्र वंशोन च ग्र (३२/८) स्तत्र ज्यार्धं शोव १२
इयं कोटिः। क्षेत्रदर्शनं।  द्वितीयोदाहरणं॥ अस्ति स्तंभतले त्यादि सर्वोदाहरणं। दत्रा वि
ष्कंभं त्रिगुणितं व्यासः। ३०। जीवा १८ शर ३। अत्र ज्यार्धस्तंभो च्छ्रय हस्ताः ९ वर्गः ८१। व्या
स ३० शर ३। अने नोना व्यासः २७ इदं व्यालबिलांतरालं। अनेन भक्ते (८१/२७) लब्धं ३ अयं शर॥
शरोन व्यासयोजिते जाते ३० इदं व्यासमानं॥ अर्धं १५। इदं व्यालकलापि नोः समगतो मेल
कस्थाने॥ अयं कर्णः॥ अत्र शोधं १२ इदं भुजमानं। तृतीयोदाहरणं। चक्रक्रौंचकुलितइत्यादि॥
अत्र व्यासप्रमाणं नाद त्रिशिरजीवेदर्शिते॥ शरजीवाभ्यां व्यासानयनं। पद्मस्य मज्जनस्था
नमध्ये जीवार्धं हस्तौ २ वर्गः ४ पद्मदर्शपंश्रारः (१/२) अनेन छेदांश विपर्यासेन भक्ते (४/१)(२/१) जातं ८ इदं शरोनव्या
सप्रमानं शरसंयुतं। छेदसादृश्यपूर्वकं तो जाते इदं (१७/२) व्यासमानं। अर्धं (१७/४) अ यं कर्णः। शरोनव्या
समानं (८/१)(१/२) छेदसादृश्यपूर्वेकृते जातं (१५/२) अर्धं १५ इयं कोटिः इदमेव जलगंभीर्य॥ अ

थ व्यासः ८० जीवा ४८ शरः ८ इदं लघुखंडात् शरात् वृत्तच्छेदानयनं॥ लघुजीवा ४८
वर्गे ४ लघुशरः २ अनेन भक्ते जातं ८ इदं वृहच्छरमानं॥ अत्र लघोः शरे युताने प्रागवत्को
टिक योस्तः शर ८ इतं अपरोदाहरणं॥ वृत्ताधस्तनानोच्छ्रया दित्या दि। अत्र मानं॥ ५०० जी
वा ४०० शर १०० इत लोच्छ्रयं शरः शरांतरं जीवार्धं २०० वर्गे ४०००० शरो व्यासः ४००
अनेन भक्ते ४०००० लब्धं १०० अयं शरः। शरोन व्यासेपूर्ण संयुक्ते ५०० अर्धं २५० अयं कर्णः॥
न्य अत्र शरोन व्या ४०० से शरोने कृते ३०० अर्धं १५० इयं कोटिः शराद् ध्वं कोटिमानं ५० एतदुड्डीयमा
नं॥ प्रागुवत् समगतिर्ज्ञातिव्या क्षेत्र दर्शनं।  वृत्तादायतचतुरस्रं साध्यं॥ द्विगुण शरोन व्या
सेन क्षोद्यास द्वलेन कर्तो नायतचतुरस्रं यथा। वृत्तस्य व्यासः॥  शरः २ द्वि
गुणः ४ अनेनोनो व्यासः ६ ऊनीकृते ६ इयं कोटिः ६ आयत स्य कर्णः १०
वर्गे १०० कोटिवर्गे ३६ अंतरं ६४ अस्य मूलं ८ अयं भुजः। ज्या व्यासकर्णयोरंतरमूलं को
टिः ज्या ८ वर्गे ६४ व्यासः १० वर्गे १०० अंतरं ३६ अस्य मूलं कोटिरियं इयं यदि व्यासार्द्धेनाध्य
नेत दोनयतोऽपि शरतुल्ये द्वे खंडे अवशिष्यते। वृत्ते दर्शनं॥ यद्येक एकत्र शर आनेतु
मिष्यते॥ तदास्मादर्धं ग्राह्यं। एतत्सर्वत्र दर्शये दिति॥ वृत्तांतस्त्र्यस्रादिनवास्रांतानां भु
जानयनाय सूत्रं॥ त्रिद्व्यंकाग्निनभश्चंद्रैः १०३९२३ त्रिबाणाष्टयुगाष्टभिः ८४८५३ वेदाग्निपंचखखा
श्वेभैः ८७०५३४ खखाभ्राभ्ररसैः ६०००० बाणेषुनखबाणैश्च ५२०५५ द्विद्विनंदेषुसागरैः ॥८५॥
४५९२२ कुरामदशवेदैश्च ४१०३१ वृत्तव्यासे समाहते। खखखाभ्रार्क १२०००० संभक्तेल

भ्यंते क्रमशो भुजाः॥ वृत्तांतस्त्र्यस्रपूर्वाणां नवास्रांतं पृथक् पृथक् वृत्तव्यासे वृत्तक्षेत्रविष्कंभे त्रिद्व्यंका
ग्निनभश्चंद्रैः। त्रयश्च द्वौ च अंकाश्च अग्नयश्च नभश्च चंद्रश्च त्रिद्व्यंकाग्निनभश्चंद्रास्तैस्त्रिद्व्यंका
ग्निनभश्चंद्रैः॥ लक्षमेकं त्रीणि सहस्राणि नवशतानि त्रयो विंशतिः गुणनीय। अस्मात् त्रिद्व्यंकेगुणि
ते खखखाभ्रार्कसंभक्ते विंशतिसहस्राधिकलक्षभक्ते वृत्तक्षेत्रस्य मध्ये त्रिभुजस्य भुजा भवंति
॥ त्रिबाणाष्टयुगाष्टभिः चतुरशीतिसहस्राणि अष्टशतानि त्रिपंचाशदधिकानि एभिर्गु
णिते व्यासे हते विंशतिसहस्राधिकलक्षभक्ते वृत्तक्षेत्रस्य मध्ये चतुरस्रसमचतुर्भुजस्य भु
जा भवंति॥ वेदाग्निपंचखखाश्वेभैः सप्तसहस्राणि पंचशतानि चतुस्त्रिंशदधिकानि एभिर्गुणिते व्यासे
हते विंशतिसहस्राधिकलक्षभक्ते वृत्तमध्ये समपंचास्रस्य भुजा भवंति॥ खखाभ्राभ्ररसैः
षष्टिसहस्रैर्व्यासे गुणिते विंशतिसहस्राधिकलक्षभक्ते वृत्तांतः समषड्भुजस्य भुजा भ
वंति॥ बाणेषुनखबाणैः पंचपंचाशदधिक द्विपंचाशत्सहस्रैर्गुणिते विंशतिसहस्रा
धिकलक्षभक्ते वृत्तांतः समसप्तभुजस्य भुजा भवंति॥ द्वाविंशत्यधिकनवशतपंचचत्वारिं
शत्सहस्रैर्व्यासे गुणिते विंशत्यधिकलक्षभक्ते वृत्तमध्ये वृत्तांतः समाष्टास्रस्य भुजा भवंति॥
कुरामवेदैः एकत्रिंशदधिक एकचत्वारिंशत्सहस्रैर्व्यासे हते विंशतिसहस्राधिकल
क्षभक्ते वृत्तांतर्नवास्रभुजा भवंति॥ उदाहरणं॥ सहस्रद्वितयं व्यासो यत्र वृत्तस्य मध्य
तः॥ समत्र्यस्रादिकानां मे भुजान्वद पृथक् पृथक्॥ ॥यद्वृत्तं वर्तुलक्षेत्रं सहस्रद्वित

यव्यासं। सहस्रद्वितयो। व्यासो। विस्तारोयस्यतत् सहस्रद्वितयव्यासं। तस्यवृत्तस्यम
ध्यतः समत्र्यस्रादीकानांक्षेत्राणांनवास्रांतानां पृथक् पृथक्भुजान्वदकथय॥॥
१०३९२३ २००० १२०००० भाज्यभाजकौसहस्रद्वयेनापवर्त्य गुणहारौत्रिभिरपवर्त्तितौ ३४६४१ ४० भाज्य
लब्धं १७३२ इदंत्र्यस्रभुजमानं। चतुरस्रस्ययथा। ८४८५४३ २००० १२०००० भाज्य
भाजकौप्रा २ गूवदपवर्त्तितौ ८४८५४३ १ हृतेभक्तेच ६० लब्धंचतु
रस्रभुजमानं॥ १४१४ पंचास्रस्ययथा॥ ७०५३४ २०००० २०००० भाज्य भाजकौप्रा
ग्वदपवर्त्य गु ६७ ६० णहारौद्वाभ्यामपव र्त्तितौजातौ ३५२६७ ३० भक्तेल
ब्धंपंचास्रेभुजमानं॥ ११७५ षडस्रस्ययथा॥ ६०००० २००० २०००० भाज्य भाजको
प्राग्वदपवर्त्यगुण ७७ ३० हारौषष्ठ्याषष्ठ्यापवर्त्तितौएके नत्र केलब्धंष
डस्रेभुजमाने १०००॥ सप्तास्रस्ययथा॥ ५२०५५ २००० १२०००० भाज्य भाजकौप्राग्वदप
वर्त्यगुणहारौपंचभिरपवर्त्तितौजा तौ १०४११ १२ भक्तेलब्धंसप्तास्रेभु
जमानं ८६७ अष्टास्रस्ययथा। ४५९२२ २००० १२०००० भाज्यभा जकौप्राग्वदपवर्त्यगुण ॥८६६॥
हारौद्वा ७ १२ भ्यामपवर्त्तितौ जातौ २२९६१ ३० भक्तेलब्धंअष्टास्रेभुजमा

नं ७६५ नवास्रस्ययथा ४१०३१ २००० १२०००० भाज्यभाजकौप्राग्वदपवर्त्य ४१०३१ हृतेभक्तेल
३० ब्धंनवास्रेभुजमा नं ६८३ ५१ ६० क्षेत्राणामुक्रमेणद ६० र्शनंयथा॥॥॥





एवमिष्टव्यासेऽन्यस्मिन्नपि विस्तार ए
भ्योऽङ्कवांकेभ्यो ऽन्याऽपिजीवाःसिध्यंति॥
निबध्यंते॥ वास्तुगोलेजोत्पत्तौवक्ष्ये। सिद्धांतेन्
यूनौजीवासाधनेकथयिष्यामि॥ अथस्थूल
जीवासाधनेज्ञानंलघुप्रक्रियया। चापोननिघ्नपरिधिः प्र
थमाख्यः स्यात्पंचाहतः परिधिवर्ग

चतुर्थभागः॥ आद्येनितेन खलु तेन भजेच्चतुर्घ्नं व्यासाहतेप्रथमभाप्रमितं ज्यकास्यात्॥ चापेन निघ्नप
रिधिः। चापेनकुनो दुनस्या पोनः। चापोनश्च निघ्नश्च सचासौपरिधिश्च चापोनपरिधिः। प्रथमा
ह्वयः स्यात्॥ प्रथमसंज्ञास्यात्॥ परिधिवर्गचतुर्थभागः परिधेर्वर्गः तस्यचतुर्थभागः पंचाहतः प
चगुणितः। खलुनिश्चयार्थे॥ तेनतथाभूतेन परिधिवर्गचतुर्थभागेन आद्योनितेन आद्येनप्र
थमाह्वयेनऊनितेनप्रथमेप्रथमाह्वये॥ चतुर्भिर्हतं चतुर्घ्नं व्यासहतं विक्षेपगुणितं विभजे
त्॥ आप्तंलब्धंफलंज्यकाभवतिजीवास्यात्॥ उदाहरणं॥ अष्टादशांशेन वृत्तेसमानमेकादि
न्॥ आसंलब्धंफलंज्यकाभवतिजीवास्यात्॥ पृथक्पृथक्तत्रवदाशुजीवा खवाग्नैर्मितं व्यासदलंचयत्र॥ वृत्तेपरिधेः
घ्नेननव यत्रचापे॥ पृथक्पृथक्तत्रवदाशुजीवा खवाग्नैर्मितं व्यासदलंचयत्र॥ वृत्तेपरिधेः
रष्टादशांशेन अष्टादशभागेनसमानंतुल्यंचापंयत्रभवति। किंविशिष्टेनाष्टादशांशेन एका
दिनिघ्नेन। एकादिनवांते पृथक्पृथक्गुणितेन। प्रथममेकेनहतं व्यासस्ततोद्वाभ्यां ततस्त्रिभि
रित्यादि॥ तत्रचापे पृथक्पृथक्जीवाः प्रत्येकं वावद॥ आचक्ष्व॥ यत्रक्षेत्रे व्यासदले विष्कंभार्धं
खवाग्नैर्मितं विशत्यधिकशतप्रमाणं। एतत्द्विगुणं व्यासमानमित्यर्थः॥ व्यासः २४० अत्रप
रिधि ७५४ परिधेरष्टादशांशो ४२ एकेनगुणितेनतदेव। अनेनपरिधिरूनीकृतो ॥८७॥
जातः ७१२। अयंचापेननिघ्नः ४२ गुणितेजातं। २९९०४॥ अयंप्रथमाह्वयः॥ परिधिः
७५४॥ वर्गो ५६८५१६। चतुर्थांशो ७१२ ॥१४२१२९॥ अयंपंचाहतः ७१०६४५ आद्येनऊनीकृतो ७१०६४५ / २९९०४

पातितेजातं। ६८०७४१ प्रथमः॥ २९९०४ चतुर्थे व्यासघ्नश्चाव्यासएवचतुर्भिर्गुणितः ९६० जातं ९६०
अनेनहतं ९६० / २८७०७८४० जातं। २८७०७८४० आद्येनितेन हर्वकेनभागः॥ २८७०७८४० / ६८०७४१ लब्धे शेषं विना
लब्धं ४२ इदं ज्यामानं प्रथमधनुषः॥ द्वितीयं धनु॥ ४२ घाभ्यां हते ८४ परिधिः ७५
४। धनुषाऊनः ६७० धनुषाहतेजातं ५६२८० अयप्रथमाह्वयः॥ परिधिवर्गचतुर्थांशोपंचघ्नो ७१०
६४५। आद्योनितः ७१०६४५ पतितेजाते ५६४३६५ प्रथमः ५६२८० व्यासेचतुर्भिर्हते ९६० अनेन
हते ९६० / ५६२८८०० जातं ५४०२८८०० हर्वेणाद्योनितेनभागः ५४०२८८०० / ६५४३६५ लब्धे लब्धं द्वितीयधनुषोज्या
माने शेषत्यागेच ८२ तृतीयधनुः ८२ त्रिभिर्गुणितेजातं १२६ परिधि ७५४ धनु
षाऊनः ६२८ धनुषाहतेजातं ७९१२८ अयंप्रथमपरिधिवर्गचतुर्थांशो पंचघ्नो ७१०६४५ आद्योने
७१०६४५ पातितेजाते ६३१५१७। आद्य ७९१२८ चतुर्घ्नव्यासघ्न इतिजातं ७५९६२८८० आद्योनितेन
के ७५९६२८८० शेषविनालब्धं तृतीयधनुषोज्यामानं॥ १२० एवंसर्वेषांशेषाणांधनुषांज्याः साध्याः
चतुर्थधनुषश्चारभ्यज्यादर्शनं। १५४। १८४। २०८। २२६। २३६। २४०। इदं स्फुजजीवाप्रमाणं॥ अथस्तु
षाद्यपरिधेरष्टादशांशेनपरिधिंधनूंषिचापवत्यंज्याः साध्यंते तथापिता एवंभवति। परिधे

रष्टादशांशेन धिवला रित्राताय रिधिरपवर्त्तितः धनुश्च इति कृते जातं परिधिः॥१८ धनुः १४ धनु
षाकृने कृते। १० निघ्नेतदेव १५ अयं प्रथमाङ्कः। परि: २४ वर्ग ३२४ चतुर्थांशो ८१ पंचघ्ने ४०५ प्रथमा
निते ४०५ पातितेजातं ३०० प्रथम: १५ चतुर्थे व्यासघ्न: ९६ गुणिते जातं १९२० एवेर्णाघो निते
ननेन १९२० शेषत्यागे लब्धं ज्यामाने ४२ एवंमपवर्त्तशेषाणामपिज्यामानानि तान्येवमनव
ति। एवमपि ३ रेव्यासे चासिध्यंति। धनुरानयने कारणसूत्रं। व्यासाब्धिघातयुतमौर्विकया विवि
नक्ते जीवांघ्रि पंचगुणितपरिधेस्तु वर्ग॥ लब्धोनितोत्परिधिवर्गचतुर्थभागादाप्तेपदे हृत
दलात्पतिते धनुस्यात्। तुश्चवधारणे। परिधेः परिणाहस्य वर्गः जीवांघ्रिपंचगुणितः॥ जी
वाया अंघ्रिश्चतुर्थांशो जीवांघ्रिः॥ जीवांघ्रिणा पंच निघ्न गुणितो जीवांघ्रिपंचगुणितः व्यासा
ब्धिघातयुतमौर्विकया विनक्त॥ व्यासश्च अब्धिघातश्चतुर्निर्गुणनं व्यासाब्धिघातस्तेन यु
तास्तां सदिगमौर्विका व्यासाब्धिघातयुतमौर्विका जीवा तया व्यासाब्धिघात मौर्विकया विना
जित। परिधिवर्गचतुर्थभागात् परिणाहवर्गचतुर्थांशात्। एवंयत् लब्धं फलं तेन ऊ ॥ ८८॥
नितात् हितात् आप्ते पदे प्राप्ते आसन्नवर्गमूले वृत्ते दलात् परिध्यर्द्धात् पतिते शेषं धनुः स्य

स्यात्॥ धनुः प्रमाणं नवतिउदाहरणं। विहिता इह ये गुणास्ता नो वदते षामधुना धनुर्मिती:॥ यदि ते स्ति
धनुर्गुण क्रियागणिते धनुषो गुणा जीवा धनुर्गुणा। तत्र क्रिया करणं। तस्य -णितं धनुर्गुण क्रियाग
णितं। तस्मिन् धनुर्गुण क्रियागणिते। तिनैपुणं अतिकौशलं मस्ति विद्यते। ततो ये गुणा याजीवा
इह विदिताः परिज्ञाताः तेषां गुणानां धनुर्मिती:॥ व्यासः॥ २४० अब्धिघात: ९६० इतने २६ मौर्विका ४२
युते १००२ अयं भाजकः॥ अथ परिधि: ७५४ धनुः प्रमाणानि प्रतं वद ब्रूहि। व्यास ४२। ८२।१२०।१५४
२०८।२२६।२४० धनुरानयनं वर्ग: ५६८५१६ जीवाया: ४२ अंघ्रिणा चतुर्थांशेन ४२ गुणिते २३८९९६९३
तथा पंचनिर्गुणितः ११९३८०३६९ अयं भाज्य: पूर्वोक्तेन भाजकेन हृत: लब्धं २९७८९ शेषं २०६४ स्व
ल्पांतरत्वात् त्याज्यं। परिधिवर्ग: १५६८५१६ अस्य चतुर्थांश: २४२१२९ लब्धेन ऊन: शेषं ११२३४२ अस्मा
दाप्तं पदं ३३५ शेषं त्याज्यं। वृत्तदलात् ३७७ पातितं। शेषं लब्धं धनु: ४२। एवं क्रमेणास्थितानि ज्यातानि ज्या
क्रमेण धनुषि ४२।८४।१२६।१६८।२१०।२५२।२९४।३३६।३७७। अथवा सएवापवर्तितः परिधि: १८ तस्मादानय
नं। व्यास २४०। अब्धिघातेन ९६० युतमौर्विकया १००२ भाजकेन परिधि: १८ तस्मा वर्ग ३२४ जीवांघ्रिणा
अपवर्त्तितेन ३ गुणित: ------ छेदनक्त ३४०२ तथा पंचगुणित: १७०१० अयं प्रागानीत भाज

केनहृतो लब्धं ७ पतितं जातं शेषं धनुः परिधेः॥१८ वर्गस्य चतुर्थभागः॥८१॥ लब्धेन ऊनः ९४ तस्मा दा
सपदं ८ वृत्तिः १८ दलात् ९ पतितं जातं १ शेषं १ धनुः॥ एवं कर्मणा जातानि सर्वाणि धनूंषि १।२।३।४।५।६।
७।८।९। एतानि प्राक्कृतेन पातितानि केन परिधेरष्टादशांशेन ४२॥ गुणितानि जातानि। ४२।८४।१२६
१६८।२१०।२५२।२९४।३३६।३७७ एवं सर्वत्र धनूंषि साध्यानि। अत्र श्रीभास्कराचार्येण प्रौढिमत्त्वेन वृ-
त्तक्षेत्रान्तर्भावित्वात् फलं पृथक् नोदीरितं। नहस्तसंख्या स्यात्॥ इति क्षेत्रव्यवहारः। अथ खातव्य-
वहारे करणसूत्रं। सार्द्धं। गणयित्वा विस्तारं बहुषु स्थानेषु तद्युतिर्भाज्या स्थानकमित्या सममि-
तिरेवं दैर्घ्ये च वेधे च॥१॥ क्षेत्रफलं वेधगुणं खाते घटिघातेत्यादि निर्णयोक्तकरणैः फलं विद्या
या वेधगुणं सत् घनहस्तसंख्यं स्यात् भवति। उदाहरणं॥ भुजवक्रतया दैर्घ्यं दशेशार्ककरैर्मि-
तं। त्रिषु स्थानेषु षट्पंचसप्तहस्ता विस्तृतिः। यस्य खातस्य वेधोपि द्विचतुस्त्रिमितः सखे। तत्र खाते
कियंतः स्युर्घनहस्ताः प्रचक्ष्व मे। यस्य खातस्य दैर्घ्यं आयामः। भुजवक्रतया बाहुकोटिल्येन। द-
शेशार्ककरैर्मितं। दशएकादशद्वादशहस्तप्रमाणं विस्तृतिर्विस्तारः॥ त्रिषु स्थानेषु षट्पंचसप्त- ॥८५॥
हस्ताः स्युः स्यात्। वेधोपि चतुस्त्रिमितः॥ त्रिषु स्थानेषु द्विचतुस्त्रिप्रमाणः। हे सखे तत्र खाते कियंतो-



घनहस्ताः स्युः॥ मे मम प्रचक्ष्व कथय। न्यासः॥ सममितिकरणं। दैर्घ्यस्थानानि १०।११।१२
योग ३३ स्थानकमिति ३ अनया भक्ते ३३/३ लब्धं दैर्घ्यसममितिः ११ विस्तारस्थानानि ६।७।
५। योगे १८ स्थानक ३ अनेन भक्ते १८/३ लब्धं विस्तारमानं ६ वेधस्थानानि २।४।३ योगे
९ स्थानक ३ अनेन भक्ते ९/३ लब्धं वेधमानं ३ एकत्र खातमानं द्रष्टव्यं [६ ३ ११] भुजको-
टिघाते ६६ जातं ६६। वेधे अनेन हते ३ जातं १९८ एते घनहस्ताः॥ करणसूत्रं। मु-
खजतलजतद्युतिजक्षेत्रफलैक्यं हृतं षड्भिः क्षेत्रफलं सममेवं वेधगुणं तत्तु घन-
फलं स्पष्टं। समखातफलत्र्यंशः सूचिखाते फलं भवति॥ क्षेत्रफलं एवं वं अमुना प्रकारेण समं
तुल्यं भवति॥ कथा मुखजतलजतद्युतिजक्षेत्रफलैक्यं। मुखजं च तलजं च तद्युतिजं च क्षेत्रफ-
लं च मुखजतलजतद्युतिजक्षेत्रफलानि तेषामैक्यं मुखजतलजतद्युतिजक्षेत्रफलैक्यं। ष-
ड्भिर्हृतं तथाभूतं क्षेत्रफलं वेधगुणं सत् स्फुटं घनहस्तात्मकं फलं भवति। समखातफलत्र्यं-
शः। समखातक्षेत्रस्य तृतीयो भागः सूचिखाते वृत्तचतुरस्रादिवत् कलाकारं खातं सूचीखातं
तत्र सूचीखाते फलं भवति॥ उदाहरणं॥ ॥मुखे दशद्वादशहस्ततुल्यं विस्तारदैर्घ्यं तु तले तदर्धं॥

यस्याः सखि सप्तकरस्य वेधः॥ खातस्य संख्यां वद तत्र वाप्यां॥ यस्याः वाप्याः मुखे विस्तारदैर्घ्यं तु तले तत
दैर्घ्य । पैविस्तारश्च दैर्घ्यं च विस्तारदैर्घ्यं । दशद्वादशहस्ततुल्यं । दशा च द्वादश च दश द्वादशाते च तेह
स्ताश्च दश द्वादश योगे हस्ताः तैस्तुल्यं समानं दश द्वादश हस्त तुल्यं ॥ पुनस्तले । धस्तनप्रदेशे तद
र्ध दश द्वादशार्धं पंच षट् संसं वेधः सप्तकरः ॥ सप्तकरप्रमाणः ॥ हे सखि तत्र वाप्यां खातस्य प्रमाणं
संख्यां वद ॥ न्यासः [१० ५ ६ १०] मुखजः १२/१० भुजकोटिघाते । कृते १२० तलजः ६/५ भुजकोटिघाते कृते
जातं ३० तद्युति षाद [illegible] राशयेणं योगे २२ दशापंचानां योगे १५ घाते २७० सर्वेषां युतौ ४२० षड्भि
र्भक्ते [४२०/६] लब्धं ७० वेधः ७ अनेन हते । ४९० एते घनहस्ताः ॥ उदाहरणं ॥ खाते था ति[illegible]
ग्मकरतुल्य चतुर्भुजे च किं स्यात् फलं नवमितः किल यत्र वेधः ॥ वृत्ते तथैव दश विस्तृतिः
पंच वेधे सूचीफलं वद तयोश्च पृथक् पृथक् मे ॥ यत्र खति गर्त्ते । तिग्मकरतुल्यचतुर्भुजे
तिग्मकरतुल्याः सूर्यसमीनाश्च त्वारो भुजा यस्य । तत् तिग्मकरतुल्यचतुर्भुजं ॥ तस्मिन् तिग्म
करतुल्यचतुर्भुजे द्वादशहस्तप्रमाणे चतुरस्रे । किल संभावनायां वेधो गांभीर्यं नवमितः ॥ ॥१०॥
नवहस्तप्रमाणः ॥ तत्र क्षेत्रे किं खातफलं स्यात् ॥ तथैव ॥ वृत्ते वर्तुले खाते । दश विस्तृतिः ॥ विस्तृ

तिर्विस्तारो दश ॥ दशहस्तप्रमाणो यत्र । तत्र वृत्ते खाते किं फलं स्यात् । तयोश्चतुर्भुज वृत्त खात
योः पृथक् पृथक् सूचीफलं मे मम वद कथय । न्यासः ॥ [illegible] भुजकोटिघाते । १४४ इदं क्षेत्र
फलं वेधे ९ अनेन हते [illegible] जातं १२९६ ॥ इदं घनहस्तात्मकं खातफलं । समखातफल
त्र्यंशः इत्यस्य तृतीयांशः ४३२ इदं सूचीफलं । वृत्तस्य न्यासः (१०) व्यासस्य वर्गे भनवाग्निनि
घ्न इत्यादिन्यासः ॥ १० वर्गे १०० भनवाग्निनिघ्ने ३९२७ जातं ३९२७०० पंचसहस्रभक्ते [३९२७००/५०००]
शतापवर्ते कृते वेधगुणे [illegible] पंचीनां पंचमो [illegible] पंचाशतः पंचमांशो १० [illegible] तिकृते [illegible]
भक्ते लब्धं फलं सूक्ष्मं [illegible] सूचीफलार्थं सवर्णिते छेदे त्रिनिगुणिते जाते [illegible] भक्ते लब्धं सू
चीफलं १३० अथ स्थूल[illegible] फलानयनं । व्यासः १० वर्गे १०० द्वादशहते [illegible] जातं ११०० [illegible] हृते [illegible]
वेधगुणे [illegible] कृते [illegible] जातं [illegible] ०० अपवर्ते [illegible] इदं स्थूलफलं ॥ ॥ इति श्रीलीलावतीवृत्तौ
खातव्यवहारः समाप्तः ॥ ॥ अथ चयनव्यवहारः ॥ ॥ चितौ करणसूत्रं ॥ उच्छ्रयेण गुणितं चितेः
किल क्षेत्रसंभवफलं घनं भवेत् ॥ इष्टकाघनहृते घने चिते रिष्टिकापरिमितिश्च लभ्यते ॥ इष्ट
कोच्छ्रयहृदुच्छ्रितिश्चितेः स्युः स्तराश्च दृषदां चितेरपि ॥ क्षेत्रसंभवफलं ॥ क्षेत्रजफलं चिते श्च

यनस्य उच्छ्रयेण उन्नतेन गुणितं सत् घनं घनात्मकं भवेत्॥ जायेत॥ चिते चयनस्य घनेघना॰
त्मके फले। इष्टकाघनहृते। इष्टकाविस्तारपिंडदैर्घ्यांगुलोत्थेन हृते॥ इष्टिकापरिमितिः॥ इ॰
ष्टकासंख्या लभ्यते प्राप्यते। दृषदां चिते अपि पाषाणचयनस्यापि एवमेव॥ ॥उदाहरणं॥ ॥अष्टा
दशांगुलं दैर्घ्यं विस्तारो द्वादशांगुलः॥ उच्छ्रितिस्त्र्यंगुला यस्यां इष्टकास्ताश्चितौ किल। या वि॰
स्तृतिः पंचकरा अष्टहस्तदैर्घ्यं च यस्यां त्रिकरोच्छ्रितिश्च। तस्यां चितौ किं फलमिष्टिकानां संख्या च
ब्रूहि कति स्तराः स्युः। यासां इष्टकानां दैर्घ्यं आयामः। अष्टादशांगुलं। पादोनहस्तप्रमाणं॥ वि॰
स्तारो विस्तृतिर्द्वादशांगुलः। हस्तार्द्धप्रमाणः। यस्यां उच्छ्रितिस्त्र्यंगुला पिंडो हस्ताष्टमांशप्रमाणः
विस्तारो किल संभाव्येत। एवं रूपा इष्टकाश्चितौ चयने भवंति। यस्यां चितौ दैर्घ्यं अष्टहस्तं। अष्टौ
कराः। या विस्तृतिर्विस्तारः पंचकराः। पंचहस्तप्रमाणा। उच्छ्रितिः। उदयकराः करत्रयप्रमा
णाः। तस्यां चितौ किं फलं भवति। इष्टकानां का संख्या। का परिमितिः। स्तरसंख्यां ब्रूहि। स्तरमानं
कथय॥ हस्तांशैः कृते इष्टकायाः न्यासः। ३/४ भुजकोटिघाते कृते जातं ३/८ उच्छ्रितिः १/८ अनया हते ॥९१॥
३/६४ जातं ३/६४ इदमिष्टकाया घनात्मकं मानं [३/४ १/२ १/८ ३/६४]। चितेन्यासः ८ ५ ३ भुजकोटिघाते घाते जाते ४०

उच्छ्रयेण त्रिभिर्गुणिते जातं १२० अयं चिते घनः इष्टकाघनेन छेदांशविपर्यासे कृते भक्ते ते
न १२० ६४/३ गुणाकभाजकन्यासात्। त्रयाणां तृतीयांशेन १ विंशत्यधिकशतस्य तृतीयांशो ४० ६४
गुणिते जातं २५६० इयं मिष्टकासंख्या। स्तरसंख्यानयनं। चितेरुदयः ३ इष्टकोच्छ्रयः १/८ अ
नेन भागः। छेदांशविपर्यासे कृते २४/१ हते जातं २४ एकेन भक्तं तदेव इदं स्तरप्रमाणं। पाषाण
चयेऽप्येवमेव। इति चितिव्यवहारः। ॥अथ क्रकचव्यवहारे करणसूत्रं। पिंडयोगदल
मग्रमूलयोर्दैर्घ्यसंगुणितमंगुलात्मकं। दारुदारणपथैः समाहतं षट्स्वरेषुविहृतं क
रात्मकम्। मूलं चाग्रं च मूलाग्रे तयोर्मूलाग्रयोः। पिंडयोगदलं। पिंडयोर्योगः पिंडयोगः तस्य द
लं अर्द्धं खंडयोगदलं। मूलाग्रयोः पिंडयोगदलं पिंडयोगार्द्धं दैर्घ्यगुणितं दैर्घ्यहतं सत् अंगु॰
लात्मकं भवति। किं विशिष्टमंगुलात्मकं। दारुदारणपथैः समाहतं। दारोर्दारणं छेदनं तस्य पंथा
नः दारुदारणपंथानस्तैर्दारुदारणपथैः समाहतं गुणितं। षट्स्वरेषुविहृतं। षट् च स्वराः स्वराश्च
इषवश्च षट्स्वरेषवस्तैर्विहृतं षट्स्वरेषुविहृतं। षट्सप्तपंचभिर्विहृतं भक्तं करात्मकं भवति॥
उदाहरणं। मूलेन वा गुलमितोऽरसत्न्मितोऽग्रे पिंडः शतांगुलमितः किल यस्य दैर्घ्यं। तद्दारुदारण

पथेषु चतुर्षु किं स्यात् हस्तात्मकं वद सखे गणितं द्रुतं मे। यस्य दारोः काष्ठस्य पिंडः स्थौ
ल्यं मूले मूलस्थाने नखांगुलमितः॥ विंशत्यंगुलप्रमाणः॥ अग्रे अग्रभागे रसचन्द्रमितः॥ रसा
श्चन्द्रश्च षोडशांगुलमितो रसचन्द्रमितः षोडशांगुलप्रमाणः। दैर्घ्यं शतांगुलमतं। हे सखे चतु
र्षु तद्दारणपथेषु। काष्ठच्छेदमार्गेषु। हस्तात्मकं किं गणितं स्यात्। मेमं मे द्रुतं शीघ्रं वद क
थयान्यासः॥ २० १०० १६ पिंड मूलं २० अग्रं १६ योगे ३६। दलं १८ दैर्घ्यशतेन गुणितं। १८०० मार्ग
४ हतं ७२०० षट्स्वरेषु ५७६ विहृतं ७२००/५७६ लब्धं करात्मकं गणितं २५/२ करणसूत्रं। छिद्यते
र्यग्रुक्रवसउ विस्तृतिहतेः फलं तद्दा। इष्टकाचितिदृषच्चितिखात तक्राकचव्यवहृतौ
खलु मूल्यं। कर्मकारजनसंप्रतिपत्त्यातन्मृदुत्वकठिनत्ववशेन। तु पुनर्यदि तिर्यग्छिद्य
ते। काष्ठस्य प्याहारः॥ पिंड विस्तृतिहतेः॥ पिंडश्च विस्तृतिश्च पिंडविस्तृती। तयोर्हतिर्हननं
पिंडविस्तृतिहतिस्तस्याः पिंडविस्तृतीहतेः॥ उक्तवत् सर्ववत्। तदा तत्र फलं भवति। कर्म
कारजनसंप्रतिपत्त्या। खलु निश्चयार्थे मृदुत्वकठिनत्ववशेन। मार्दवकाठिन्यवशेन। इ
ष्टकाचितिदृषच्चिति खातक्राकचव्यवहृतौ॥ इष्टकाचितिश्च दृषच्चितिश्च खातं च क्राकच

व्यवहृतौ मूल्यं भवतीति। उदाहरणं॥ यद्विस्तृतिर्दंतमितांगुलानि पिंडस्तथा षोडश यत्र काष्ठे
छिदेतिर्यग्नवसु प्रचक्ष्व किं स्यात्फलं तत्र करात्मकं मे। यद्विस्तृतिर्यस्य यस्य काष्ठस्य विस्तृतिर्वि
स्तरः। दंतमितांगुलानि द्वात्रिंशदंगुलप्रमाणं॥ यत्र काष्ठे पिंडः स्थौल्यं षोडश षोडशांगुलानि॥ ति
र्यग्नवसु छेदेषु तिरश्चीनेषु नवसु छेदमार्गेषु। तत्फलं। तेषां छेदानां फलं। तत्र करात्मकहस्ता
त्मकं किं स्यात्। मे मम प्रचक्ष्व कथय। न्यासः॥ ३२ १६ पिंड १६ विस्तृतिः ३२ घाते ५१२ मार्गै ९
हते ४६०८ जातं ४६०८ षट्स्वरेषु ४६०८/५७६ भक्ते लब्धं करात्मकं फलं ८ हस्तात्मकं प्रपादितं॥ इ
ति लीलावती विवेके क्राकचव्यवहारः॥ राशिव्यवहारकरणसूत्रं। अनुष्णेषु दशमांशेऽणुषु
ष्वेकादशांशः परिधिनवमभागः शूकधान्येषु वेधः॥ भवति परिधिषष्ठे वर्गिते वेधनिघ्ने घन
गणितकराः स्युर्मागधस्ताश्च खार्यः॥ अनुष्णेषु स्थूलधान्येषु मुद्गतुवरीचणकप्रभृतिषु दश
मांशः परिधिदशमो भागो वेधः स्यात्। अणुषु तिलसर्षपादिषु सूक्ष्मधान्येषु एकादशांशः
परिधेरेकादशो भागो वेधः स्यात्। शूकधान्येषु परिधिनवमभागो वेधो राशेरुदयो भवति परि
धिषष्ठे परिणाहषष्ठमांशे वर्गिते वर्गीकृते वेधनिघ्ने राश्युदयगुणिते घनगणितकराः घन

हस्ताः स्युर्भवति। ता मागधखार्यः। यत्र ईत्पया भावश्चित्यः॥ एकस्मिन्हस्ते एका मागधमागध
देशप्रमाणीकृता खारीतेया। उदाहरणं। समभुवि किल राशिर्यः स्थितः स्थूलधान्यः परिधिपरिमि
तिर्भोहस्तषष्टिर्यदीया॥ प्रवद गणक खार्यः किंमिताः संति तस्मिन्। अथ पृथगणुधान्यैः शू
कधान्यैश्च शीघ्रं। योराशिर्धान्यसमूहः समभुवि सममानभूमौ स्थितः स्थूलधान्यः स्थूलं धान्यं
यस्य स स्थूलधान्यः॥ भो इति आमंत्रणे। यदीया यत्संबंधिनी परिधिपरिमितिर्हस्तषष्टिः। ह
स्तानां षष्टिर्हस्तषष्टिः॥ यदा यत्र परिधिमिते। परिधिप्रमाणं स्यात् भवति। हे गणक तस्मिन् रा-
शौ किंमिताः कियत्यः खार्यः संति। अथानंतरं पृथक् अणुधान्यैः सूक्ष्मधान्यैः शूकधान्यैश्च षष्टिका
दिधान्यैरस्मिन्नपि परिधेः प्रमाणे किं स्यात्। शीघ्रं तं वद स्फुटं कथय॥ न्यासः ◯ परिधि
६० खांशो ६ अयं वेधः परिधिषष्ठभागे १० व—ते १०० वेधगुणिते जातं ६०० एतावत्यो माग
धाः खार्यः॥ अथाणुधान्यराशिः॥ ११ परिधि ६० एकादशांशभागो वेधः ६० परि षडंशो १०
वर्गे १०० वेधगुणे १६०० भक्ते लब्धा मागधाः खार्यः ५४५। अथ शूकधान्यराशेः परिधिः। ॥ ६८२ ॥
६० नवमभागे ६०/९ उभौ त्रिभिरपवर्तितौ २०/३ अयं वेधः॥ परिधि ६० षडंशो १० वर्गे १०० वेधनिघ्ने जा

तं २०००/३ लब्धा मागधखार्यः ६६६ २/३ करणसूत्रं द्विवेदसत्रिभागैकनिघ्नात्तु परिधेः फलाद्भि
त्त्यंतर्बाह्यकोणस्थराशेः स्वगुणैः सत्रिभागैकाः ते निघ्ना द्विवेदसत्रिभागैकनिघ्नस्तस्मात् द्वि
वेदसत्रिभागैकनिघ्नात्। भित्त्यंतर्बाह्यकोणस्थराशेः॥ अतश्च बाह्यं च अंतरबाह्ये। कोणप्रु-
स्थितो यो सौ राशिः स भित्त्यंतर्बाह्यकोणस्थराशिः तस्य भित्त्यंतर्बाह्यकोणस्थराशेः॥ फलं-
धान्यराशिप्रमाणं। स्वगुणभाजितं। निजगुणकरैर्भक्तं। कोर्थः॥ भित्त्याश्रितस्य राशेः परि
धिं द्विगुणयित्वा हास्यामेव भक्तः सत्फलं भवति। अंतःकोणस्थस्य राशेः परिधिश्चतुर्भि
र्हतस्य चतुर्भिरेव भक्तः सन् फलं भवति॥ बाह्यकोणस्थस्य राशेः परिधिस्त्रिभागैकरूपेण ह-
तो निजगुणेनानेनैव भक्तः फलं भवतीत्यर्थः। अथ स्वगुणभक्त परिधीनां वासना। यदा भि
त्त्याश्रितस्तदा परिधेरर्द्धं भवति॥ द्वाभ्यां हते परिधौ समग्रपरिधेः फलं स्यात्। परिधिषष्ठे च च
वर्गे वेधनिघ्ने इति सूत्रार्थत्वात्। समग्रपरिधेः फलमानीय स्वगुणेन हृत्वा दृष्टपरिधेः फलं सा-
ध्यं इत्यभिप्रायः॥ अंतःकोणस्थराशौ चतुर्थांशो अस्ति अतः चतुर्भिर्हतः॥ बाह्यकोणस्थराशौ
भागत्रयं भणित्वा सत्र्यंशभागेन हतः॥ एवं कृते समग्रा जाताः परिधयः षडंशा प्रदा भवंतीत्यर्थः। उदा

दरणं॥परिधिर्भित्तिलग्नस्य राशेस्त्रिंशत्कराः किल॥अंतःकोणस्थितस्यापि तिथितुल्यकराः सखे॥व
हिःकोणस्थितस्यापि पंचघ्ननवसंमिताः॥तेषामाचक्ष्व मे क्षिप्रं घनहस्तान् पृथक् पृथक्॥भित्तिलग्नस्य
राशेः परिधिस्त्रिंशत्करः॥त्रिंशद्धस्तप्रमाणः॥अंतःकोणस्थराशेः परिधिः तिथितुल्यकरः॥पंचदश
हस्तप्रमाणः॥बाह्यकोणस्थितस्य राशेः परिधिः पंचघ्ननवसंमितः॥पंचगुणितनवतुल्यः॥पंचच
त्वारिंशद्धस्तप्रमाणः॥हे सखे तेषां राशीनां क्षिप्रं शीघ्रं पृथक् पृथक् मे मम घनहस्तान् वं प्रचक्ष्व
कथय॥न्यासः॥ [परिधि ३० | परि १५ | प ४५] यथाक्रमं द्विचतुः सत्र्यंशाहते त्रिंशद्भाजितां हता जातं। ६० पंचद
शाचतुर्भिर्हते जा तं ६० पंचचत्वारिंशात्सत्र्यंशाति घ्रानी ४५ ४/३ अयाएणां तृतीयां
श। पंचचत्वारिंशतस्तृतीयांशो १५ इति कृते जातं ५ ५ हते जातं ६० इति त्रयोपि परिधयः समयाः ष
ष्टिरूपा जाताः पूर्ववत्तत्र प्रक्रिया॥परिधेः। ६० षडंशो १० वर्गे १०० वेधहते ६००० स्वगुणेन द्वाभ्यां भ
क्ते ६०००/२ लब्धं ३०० द्वितीयस्य परिधिः ६० षडंशो १० वर्गे १०० वेधगुणे ६०० स्वगुणेन चतुर्भिर्भक्ते ६००/४
लब्धं १५० तृतीयस्य परिधिः ६० षडंशो १० वर्गे १०० वेधगुणे ६०० स्वगुणेन भक्ते छेदांशविपर्यासे। कृते ॥ ७९॥
६००/३/४ चतुर्णां चतुर्थांशो। षट्शतानां चतुर्थांशो १५० इति कृते जातं ५० ३/० ४५० इति राशिव्यवहारः॥

३३

छायाव्यवहारे करणसूत्रं॥शंकुप्रदीपतलशंकुतलांतरघ्नः छाया भवेद्विनरदीपशिखौच्च्यभक्तः॥
प्रदीपस्य तलं धोभागः प्रदीपतलं। शंकोस्तलं शंकुतलं। प्रदीपतलं च शंकुतलं च तयोरंतरं मध्यं प्र
दीपतलशंकुतलांतरं। तेन घ्नो गुणितः॥प्रदीपतलशंकुतलांतरघ्नः॥विनरदीपशिखौच्च्यभक्तः नरश
ब्देन शंकुरभिधीयते। विगतो नरः शंकुर्यस्मात् विनरः॥दीपस्य शिखा दीपशिखा तस्या औच्च्यं उच्चस्य भा
व औच्च्यं दीपशिखाया औच्च्यं दीपशिखौच्च्यं विनरं च तत् दीपशिखौच्च्यं च विनरदीपशिखौच्च्यं उच्चस्य
भाव औ तेन भक्तो हृत। विनरदीपशिखौच्च्यभक्तः॥स नु छाया भवेत्। छायाप्रमाणं जायेत॥उदाह
रणं।शंकुप्रदीपांतरभूस्त्रिहस्ता दीपोच्छ्रितिः सार्धकरत्रया चेत्। शंकोस्तदार्कांगुलसंमितस्य त
स्य प्रभा स्यात् कियती वदाशु॥शंकुप्रदीपांतरभूः शंकुश्च प्रदीपश्च शंकुप्रदीपौ तयोरंतरभूः मध्य
भूः॥शंकुप्रदीपांतरभूः॥त्रिहस्ता हस्तत्रयप्रमाणा॥चेद्यदि दीपोच्छ्रितिः सार्धकरत्रया। सह अर्धे
न वर्तते यत् करत्रयं तत् सार्धकरत्रयं॥सार्धकरत्रयं प्रमाणं यस्याः सा सार्धकरत्रया शंकोः॥
अर्कांगुलसंमितस्य द्वादशांगुलप्रमाणस्य तदा तस्य शंकोः प्रभा छाया कियती स्यात् किंप्रमाणा भ
वति। आशु शीघ्रं वद कथय। न्यासः [३/२ ७ ३ शं १२] शंकु १२ दीपतलशंकुतलांतरं हस्त ३ शंकोह

तेजातं ३६ दीपशिखोच्चं सवर्णितं ७/२ शंकुहस्तार्द्धं १/२ छेदमादत्रपात्पातिते जातं (२१/२) भक्ते
जातं। ६३ अनेन भक्ते ३६ लब्धानि छायांगुलानि १२ अथवा। गुलात्मके कृत्वा छाया साध्या
शंकु अंगुल १२ अंतरं तु वीहस्तत्रयस्यांगुलानि ७२ उच्छ्रितिः सार्द्धकरत्रयस्यजातान्यंगु
लानि ८४ अंतरेण शंकोर्हते ९२ जातं ८६४ उच्छ्रितिः ८४ शंकुः १२ ऊनीकृते जातं ७२ अनेन ८६४
भक्ते लब्धं १२ छायांगुलानि। यदि दीपशिखोच्छ्राय शंकुच्छाययोः विश्लेषमितायाः कोटेः हस्तत्र
यप्रमाणो भुजः। तदा द्वादशांगुलमितया कोट्या किमाप्यत इति न्यासः। कोटिः २ भुजः ३ लघु
कोटिः १२ इच्छया द्वादशांगुलानि। भुजे जाते ३६ त्रिभिः प्रमाणरूपैर्भक्ते लब्धा छायांगुलात्मका
१२ छाययोरानयने करणसूत्रं॥ छाययोः कर्णयोरंतरे ये तयोः वर्गविश्लेषभक्ता रसाद्री
षवः। सैकलब्धेः। पदघ्नं तु कर्णांतरं भांतरेणोनयुक्तं दले स्तः प्रभे। रसाद्रीषवः। रसाश्च अप
द्रयश्च इषवश्च रसाद्रीषवः ५७६ छाययो। द्वयोः। कर्णयोर्द्वयोर्ये अंतरे मध्ये तयोरंतयोः।
वर्गविश्लेषभक्ता॥ वर्गयो विश्लेषोंतरं वर्गविश्लेषः तेन भक्ता वर्गविश्लेषभक्ता॥ सैकलब्धेः। ॥९४॥
सैकाचासौ लब्धिश्च सैकलब्धिः तस्याः सैकलब्धेः॥ वर्गविश्लेषभक्तेभ्यो रसाद्रीषुभ्यो या

लब्धिः सा सैकेत्यर्थः॥ तस्या लब्धेः पदं मूलं तेन घ्नं गुणितं कर्णांतरं कर्णयो विश्लेषः॥ प्रभे छा
ये स्तः। भांतरेणोनयुक्ते। भे छाये तयोरंतरं भांतरं तेन ऊने रहिते युक्ते सहिते दले। दलीकृते छि
ते छाये न वतः इत्यर्थः। उदाहरणं॥ नंदचंद्रैर्मितं छाययोरंतरं कर्णयोरंतरं विश्वतुल्यं तथा॥
ते उभे वक्ति यो युक्तिमान्वेत्ति सोव्यक्तमव्यक्तयुक्तं हि मन्ये खिलं॥ छाययो द्वयोरंतरं नंदचंद्रै
र्मितं। नंदाश्च चंद्रश्च नंदचंद्राः तैर्मितं नंदचंद्रैर्मितं। नंदा नव चंद्र एकस्तत्तुल्यं एकोनविंशति
प्रमाणमित्यर्थः। तथा तेन प्रकारेण कर्णयोरंतरं विश्वतुल्यं त्रयोदश प्रमाणमित्यर्थः। ते उभे
छाये यो युक्तिमान्वक्ति जल्पति। हि स्फुटं। अहमिति मन्ये असौ वक्ता अखिलं समस्तं अव्यक्त
युक्तं बीजसहितं व्यक्तं पाटीगणितं वेद वेत्ति जानातीत्यर्थः। न्यासः॥ छाययोरंतरं १९ कर्णांत
रं १३ वर्गौ ३६१।१६९ अनयोर्विश्लेषः १९२ अनेन रसाद्रीषवो विभक्ताः (५७६/१९२) लब्धं ३ सैकं ४
अस्य मूलं २ अनेन कर्णांतरं गुणितं २६ जातं २६ इदं भांतरं १९ अनेन यु तं (२६) जातं ४५ ऊ
नीकृतं ७ अनयोर्दले ७/२ ४५/२ इमे छाये। छायांतरं कर्णांतरयोस्त्वशिरस्पते ७/२ ४५/२ छेदमाद
त्रपास्य सकयातिते जातं ३/२ भक्ते लब्धं छायांतरं १९। कर्णानियने क्षेत्रकल्पनोयं शंकु

भुजः लघुच्छायाकोटिस्तत्र किं कर्णप्रमाणमिति न्यासः। तत्कृत्योर्योगपदमिति सू-
त्रेण उभयोः कृती [illegible] छेदसाम्ये कृते [illegible] योगः ६२५ पदं २५ अयमे-
व कर्णः॥ द्वितीयक्षेत्रमेकल्पना तत्कृत्योर्योगपदमित्यादिना लब्धः कर्णः [illegible]
अंतरानयनं कर्णौ २५ [illegible] छेदसा- म्यात्पंचविंशतिपातिते जातं [illegible] भक्ते लब्धं
[illegible] कर्णांतरं १३॥ दीपोच्चानयने करणसूत्रं। छायोद्धृते तु नरदीपतलांतरघ्ने शंकौ भवेन्न-
रयुते खलु दीपकोच्चं। शंकौ छायोद्धृते प्रागानीते नरदीपतलांतरघ्ने॥ नरयुते शंकुसहि-
ते। खलु निश्चयार्थे। दीपकोच्चं जायेत॥ उदाहरणं॥ प्रदीपशंक्वंतरभूस्त्रिहस्ता छाया-
गुलैः षोडशभिः समा भवेत्। दीपोच्छ्रितिः स्यात्कियती तदास्य प्रदीपशंक्वंतरमुच्यतां मे॥ य-
दि प्रदीपशंक्वंतरभूः प्रदीपश्च शंकुश्च प्रदीपशंकू॥ तयोरंतरभूः प्रदीपशंक्वंतरभूः
त्रिहस्ता। हस्तत्रयप्रमाणा। छाया षोडशभिरंगुलैः समा तुल्या। त्रिभागोनहस्तप्रमाण
इत्यर्थः। तदा अस्य दीपस्य उच्छ्रितिः कियती स्यात्। मे मम उच्यतां कथ्यतां॥ न्यासः॥ अंगु- ॥२५॥
लैर्हस्तात्मके कृते॥ शंकुर्हस्तौ [illegible] छायांगुलानि [illegible] अंतरं हस्त ३ अनेन शंकौ हृते [illegible]

छायांशो छेदांशविपर्यासे कृते [illegible] हृते जातं [illegible] शंकुयुते [illegible] छेदसाम्यरूपं [illegible] युतो [illegible] भ-
क्ते लब्धं दीपोच्चं [illegible] दीपशंक्वंतरं यत्तदृष्टं तत्र प्रमाणकरणसूत्रस्योदाहरणं॥ तत्करसूत्रं॥
विशंकुदीपोच्छ्रयसंगुणा भा शंकुद्धृता दीपनरांतरं स्यात्॥ भा छाया। विशंकुदीपोच्छ्रयसं-
गुणा। विगतः शंकुर्यस्मात्स विशंकुः। शंकुनाउद्धृता शंकुहृता भक्ता दीपनरांतरं स्यात्॥ दी-
पशंक्वंतरं भवति॥ उदाहरणं॥ पूर्वोक्त एव दीपोच्छ्रयः [illegible] सवर्णिते जातं [illegible] शंकु [illegible] छेदसा-
म्ये [illegible] पातिते [illegible] छाया [illegible] गुणिते जातं [illegible] शंकुः [illegible] छेदांशविपर्यासे कृते [illegible] भक्ते
लब्धं शंक्वंतरं हस्ता ३ इष्टप्रदेशस्थशंकुद्वयांतरपरिज्ञानाय छाययोः परिज्ञानाय दीपतल-
शंकुतलयोः परिज्ञानाय करणसूत्रं। छायाग्रयोरंतरसंगुणा भा छायाप्रमाणांतरहृद्भवे-
द्भूः॥ भूशंकुघातः प्रभया विभक्तः प्रजायते दीपशिखौच्च्यमेवं। त्रैराशिकेनैव यदुक्तमेतद्व्य-
क्तं समस्तं हरिणेव विश्वं॥ भा छाया॥ अंतरसंगुणा। अंतरेण विवरेण संगुणा अंतरसंगुणा। क-
योः छायाग्रयोः प्रभापर्यंतयोः। छायाप्रमाणांतरहृत्। छाययोः प्रमाणे छायाप्रमाणे। तयोरं-
तरं छायाप्रमाणांतरं तेन हृत्। छायाप्रमाणांतरं भक्ता भूः भूमिर्भवेत् जायेत॥ भूशंकुघातः

प्रभया विभक्तः। छायया विहृतः सन् दीपशिखोच्चं दीपशिखोकायः प्रजायते। यदेतत्
टीकर्पङ्गणितं उक्तं निगदितं तत्त्रैराशिकेनैव व्याप्तं। उदाहरणं। शंकोर्नार्कमितांगुलस्यसु
मते दृष्टा किलाष्टांगुला छायाग्राग्निमुखे करद्वय मितेन्यस्तस्य देशे पुनः तस्यैवार्क मितांगु
लाय दितदा शंकुप्रदीपांतरं दीपोच्चं च कियद्वद व्यवहृतिं छाया निधावेत्सि चेत्॥ हे सुम
ते हे सुबुधे अर्कमितांगुलस्य द्वादशांगुलप्रमाणस्य शंकोः भाछायाः किल अष्टांगुला
अष्टांगुलप्रमाणा दृष्टा अदृश्यितस्यैव शंकोः करद्वयमितेदस्तद्वयपरिमिते देशे प्रदेशे
छायाग्रान्निमुखे छायाग्रसंमुखे न्यस्तस्यारोपितस्य द्विअर्कमितांगुला द्वादशांगुलप्र
माणा छाया भवति। तदा दीपोच्चं कियत् किं प्रमाणं। शंकुदीपांतरं च कियत्। तद्वद। आ
चक्ष्व। यदि छायानिधौ व्यवहृतिं छायाव्यवहारं वेत्सि जानासि। न्यासः। अत्र
शंकु अंगुल १२ अंतरं हस्तद्वयं तस्यांगुलानि जातानि ४८ छाया ८ द्वितीय छाया
१२ अष्टौ च तावि द्वादशांगुला। नाम ध्यात्प्रथमछायांगुलानि ८ शोषमंतरं अंगु लानि
४० द्वितीयछाया अंगुलानि १२ एवं छायाग्रांतरं अंगुलचतुष्कट घा ५२ छाये च ८। १२ आस्यां

दतेन घं गुलेन चतुर्निर्भक्ते $\frac{२}{१}$ $\frac{५२}{४}$ गुणः कनाजकन्यात्। चतुर्णां चतुर्थांशः। अष्टानां चतुर्थांशो २
द्वितीयचतुर्णां चतुर्थांशः १ द्वादशानां चतुर्थांशो ३ इति कृते जातं $\frac{२}{१}$ $\frac{३}{१}$ हते जातं १०४।१५६ इ
मे दीपतलशंकुतलयोरंतरे लब्धे भूमाने। दीपोच्चानयनं। भवो १०४।१५६। शंकुं १२ छाये ८।१२ शं
कुघाते प्रभया विभक्ते $\frac{१२}{४}$ $\frac{२}{१}$ अपवर्ते द्वादशानां चतुर्थांशो ३ अष्टनां चतुर्थां शो २ घाप्यामहे
चतुस्तमरशाता हे ५२ द्वि परायो द्वादशकौ गतो। जातं इति कृते $\frac{२}{१}$ $\frac{३}{१}$ $\frac{५६}{}$ १५६ त्रिनिगु
णिते जातं १५६ दीपोच्चं समानं उन्नयच्च अंगुलात्मकं भणित्वा चतुर्विंशात्या २४ विभक्ते ल
ब्धं ६ शेषं द्वादशा निरपवर्तितं $\frac{१२}{२४}$ इदं दीपशिखोच्चं। एवं अमुना प्रकारेण छायाव्यवहारे त्रैरा
शिके कल्पनया यत्नं ते यत्नं कुर्वंतु। यथा॥ प्रथमछायातो द्वितीयछायायावताधिका। तावता
छायावसवेच यदि। छायाग्रांतरं ५२ तुल्या भूर्लभ्यते॥ तदा प्रथमछायया ८ किमिति। न्यासः॥ ४।५२।८
प्रमाणे छेच्चनु निरपवर्त्य गुणिते लब्धं भूमानं १०४ द्वितीयस्य न्यास ४।५२।१२ प्रग्वल्लब्धं भूमानं।१५६
दीपोच्चानयनं। यद्यष्टांगुलछायाप्रमिते भुजे द्वादशांगुलशंकुप्रमाणा कोटिस्तदा चतुरुत्तरशत
भूतुल्ये भुजे किमिति। न्यासः ८।१२।१०४ प्रमाणे केच्छ निरपवर्तिते १।१२।१३ इच्छाहते प्रमाणं नक्ते

लब्धं दीपोच्चमंगुलात्मकं।१५६ द्वि०।२।४।५६। अग्रवत्स्थं ततदेव।१५६। चतुर्विंशत्यानके १५६ लब्धं
दीपशिखौच्चं २ एवं पंचराशिकादिकमखिलं द्वित्र्यादित्रैराशिककल्पनयैव सिद्धं। यथानंगव-
तानक्रजनक्लेशापहारिणा निखिलजगज्जननैकबीजेन सकलभुवनभवनवनगिरिसरि-
दसुरसुरनरनगरादिभिः स्वजनैर्दैरिदं विश्वंव्याप्तं तथेदमखिलं गणितजातं त्रैराशिकेनैव व्या-
प्तं। यद्येवं तत्कथं निर्बद्ध किमुक्तमित्याशंक्याह। यत्किंचित्गुणनागहारविधिनाबीजेन गणपते-
तन्त्रैराशिकमेव निर्मलधियामेवावगम्यं विदां। एतद्यत्बहुधास्मदादिजडधीधीवृद्धिबुध्याबु-
धैस्तद्भेदान्सुगमान्विधाय।। रचितं प्राज्ञैः प्रकीर्णादिकं। यत्किंचिद्भागमस्येनपाटिरूपं बीजादी-
गुणनागहरविधिनागुणनाकारभागहरप्रकारेण बीजेन वा तत्तडथप्रसिद्धिनपा गणपते संख्याय
ते संख्यायते। तत्समस्तं निर्मलधियां निर्मलबुद्धीनां विदां विदुषां।। अत्र तृतीया स्थाने षष्ठी अवगं-
तव्या तेव सति रितिचेत्। विद्वद्भिः निर्मलबुद्धिभिः त्रैराशिकमेव राशित्रयनिष्पन्नगणितविशेष ॥५७॥
रूपमेवावगम्यमवबोध्यं कोभावः।। एतत्सर्वमेकेनैव त्रैराशिकेनगुरूपदिष्टविधिना निष्पद्यते। य-
द्येवं तर्हि किमर्थमेतावान्ग्रंथेषु प्रपंचो व्यरचि। पूर्वाचार्यैरित्याह।। एतद्बहुधेत्यादि यदेतद्यदिदं

२१

बहुधाबहुभिः प्रकारैः ग्रंथेषु प्रपंचेन तद्भेदान् संकलितं व्यवकलितादीन् सुगमान् सुबोधान् वि-
धाय विरचय्य प्रकीर्णकादिकं गणितं व्युत्पादकं करणसूत्रादिकं रचितं विरचितं बुधैर्गणित-
कुशलैरस्मदादीजडधाधीवृद्धिबुध्या।। वयमादिर्येषां ते अस्मदादयस्ते च ते जडधियश्च मंद-
मेधसश्च तेषां उत्पपरिहाराय। कविर्जडधिषु आत्मानं मुख्यं निर्दिष्टवान्। तेषां धीबुद्धिस्तस्याः वृद्धिरु-
ल्लासः।। तस्य बुद्धिः परिज्ञानं। तया हेतुभूतया किंतु नामामंदसां मेधसां प्रतिभोल्लासः स्यात्। सप्रपं-
चग्रंथे व्युत्पाद्यमानाभिः क्रिमेण प्रौढमतयो भवतीतिभाव।। अन्यथा एकेन त्रैराशिकेन सकलग-
णितनिष्पत्तिः स्यादित्यर्थः।। ।।इति श्रीरामदेवात्मजसुवर्णकारमोघदेवविरचितायां लीलाव-
त्या विवृत्तौ छायाव्यवहारः समाप्तः।। ।।अथ कुट्टके करणसूत्रं।। भाज्यो हारः क्षेपकश्चापवर्त्यः
केनाप्यादौ संभवे कुट्टकार्थं। येन छिन्नौ भाज्यहारौ न तेन क्षेपश्चैतद्दुष्टमुद्दिष्टमेव। परस्प-
रं भाजितयोर्ययोः शेषस्तयोः स्यादपवर्तनं स।। स्वनायवर्तेन विभाजितौ यौ तौ भाज्यहारौ दृढ-
संज्ञकौ स्तः।। मिथो भजेत्तौ दृढभाज्यहारौ यावद्विभाज्ये भवतीह रूपं। फलान्यधोधस्तदधो निवे-
श्य।। क्षेपस्ततः शून्यमुपांतिमेन। स्वोर्ध्वे हतेंत्येन युतेतदंत्यं त्यजेन्मुहुः स्यादिति राशियुग्मं

ऊर्ध्वो विभाज्येन दृढेन तष्टः फलं गुणौ विशोध्यौ स्वतक्षणाच्छेषमितौ तु तौ स्तः॥ संभवे सति अपवर्त्तस्य घ
टनायां सत्यां आद्यो प्रथमं भाज्यः भजनीयांकः केनाप्यंकेनापवर्त्त्य छेद्यः। हारच्छेदोऽपि तेनैवापवर्त्यः क्षे
पकश्चेत्येषां कश्चापवर्त्यः किमर्थं॥ कुट्टकार्थं। कुट्टकविधये येनांकेन भाज्यहारौ छेद्यौ दृढकौ छि
न्नौ अपवर्त्तितौ भवतः। तेनांकेन चेद्यदि पः क्षेपांकोऽन छेद्यते तत् तु दृष्टं साध्यं। उद्दिष्टं उक्तं। एवकारो
निश्चयार्थः। ययोर्भाज्यहारयोः परस्परं अन्योन्यं भाजितयोर्भजनक्रियोर्यः शेषः उर्वरितांकः स स्तयोर्भा
ज्यभाजकयोरपवर्त्तनं स्यात् छेदो भवति। यो भाज्यहारौ स्वेनापवर्त्तनेनात्मीयेन शेषांकेन विभाजितौ विक्षो
भतौ तौ भाज्यहारौ दृढसंज्ञौ भवतः। तौ दृढसंज्ञौ भाज्यहारौ मिथः परस्परं तावद् भजेत् भागं हरेत्। यावद्वि
भाज्ये भजनीये रूपं भवति रूपं शेषं स्यात्। फलानि भजनाल्लब्धानि यानि तानि अधोऽधस्तलाद्धस्तात्
स्थाप्यानि। तदधस्तेषां फलानां अधस्तात् क्षेपः क्षेपांको निवेश्यः स्थाप्यः। ततस्तस्मात् क्षेपादधः शून्यं खं निवेश
येत्। एवमधोधोऽंकपंक्तेर्वल्लीति संज्ञा। उपान्तिमेन उपसमीपे अन्तिमो यस्य स उपान्तिमस्तेन उपान्तिमेन स्वो
र्ध्वे स्वतः आत्मनः ऊर्ध्वे ऊर्ध्वांके ऊर्ध्वे हते गुणिते अन्त्येन अन्त्यांकेन युतेन सहिते सति नतं अन्त्यं त्यजेत्। जह्या ॥९८॥
त् मुहुर्वारं वारं एवं तावत्कुर्याद्यावद्द्वौ स्थितानामंकानां राशियुग्मे राशिद्वयं स्यात्। ऊर्ध्वः॥ ऊर्ध्वांक

उपरितनो राशिः॥ दृढसंज्ञेन विभाज्येन तष्टो भक्तः॥ फलं लब्धिर्भवति॥ अत्र कुट्टकविधौ एवं अ
मुना प्रकारेण फलरूपे गुणलब्धी तदेव स्यातां। यदा ता लब्धयः समाः स्युर्द्विश्चतुःषडाद्या भवंति॥
चेद्यदि ता लब्धयो विषमास्त्रिपंचसप्तप्रभृतयः। स्युस्तदा ईतस्मिन् प्रकारे यथागते यथोक्तक
रणोत्पन्ने लब्धिगुणे स्वतक्षणान्निजदृढसंज्ञभाज्यात् भाजकाद्विशोध्यौ। शेषसमौ उर्वरितां
कतुल्यौ तौ स्तः॥ लब्धिगुणौ भवतः। उदाहरणं॥ ॥एकविंशतियुतं शतद्वयं यद्गुणं गण
क पंचषष्टियुक्। पंचवर्जितशतद्वयोद्धृतं शुद्धिमेति गुणकं वदाशु तं॥ हे गणक हे गणितज्ञ शत
द्वयं एकविंशतियुतं एकविंशत्या सहितं। यद्गुणं। यो ऽंको यस्य गुणस्य अंसो यद्गुणं कं यद्गु
णं किं विशिष्टं पंचषष्टियुक् पंचषष्ट्या युतं। पंचवर्जितशतद्वयोद्धृतं। पंचभिर्वर्जितं ऊनीकृतं शत
द्वयं पंचवर्जितशतद्वयं तेन उद्धृतं भक्तं पंचवर्जितशतद्वयोद्धृतं। शुद्धिं एति निरवशेषो भवति॥
तं गुणकं आशु शीघ्रं वद आचक्ष्व। न्यासः॥ भा २२१ हा १९५ क्षेपक ६५ परस्परं भाजितयोरिति हारेण भाज्ये भक्ते
जातं २६ | १९५ भाजनात् शेषेण षड्विंशत्या हारे भक्ते १९५ शेषं १३ त्रयोदशभिः पुनश्चेत् षड्विंशति
र्भज्य तेयो राशि निरवशेषो भवति। अत्र शेषेण त्रि क्रिया अन्ते त्रयोदश एव शेषः। एभिस्त्रयोदशभिर्भा

र्भहारक्षेपाः पृथक् पृथक् ॥ अपवर्त्तिताः जाताः २३/६५ । २६५ । ६५ । लब्धं क्रमेण ७ क्षेप ५ इमौ भाज्यहारौ दृढसं
ज्ञौ इ नामानौ परस्परं भाजितौ पंचदशाभिः सम दशाप्तक्ता २१ । लब्धं १ शेष २ शेषर घाभ्यां पंचशाप्तकाः
२ लब्धा ७ शेषः १ एकत्र लब्धिर्दर्शनं ७ । अनयोरधः क्षेपः तदधः शून्यमिति कृते । जाता वल्ली ७ उपां
तिकेन पंचकेन स्वोर्ध्व एके हते जातं ३५ अंके पंचके ऊर्ध्वांके योजिते ७ सप्तके हते २ पंचत्रिंशतो
मध्ये त्ये शून्ये योजिते पितदेव ३५ पुनरुपांत्येन पंच त्रिंशता ऊर्ध्व एके हते जातं ३५ अंके पंचके ऊर्ध्वांकि
ऊर्ध्वांके योजिते राशिद्वयं जातं ४० एतौ दृढभाज्यहाराभ्यां तष्टौ ४० ३५ शेषं जातं १५ इमौ लब्धिगुणौ ५ ७
हते जातं ११०५ क्षेपं ६५ युते ११७० हरेण भक्ते ११७० लब्धं १८ अथ एतयोः स्वतक्षणं क्षेपः ७ ५ योजिते जा
तौ लब्धिगुणौ २३ । २० भाज्ये त्रिशत्या गुणिते २३ जातं ४४२० क्षेपः ६५ अस्मिन् योजिते जातं ४४८५ हरेण
भक्ते ४४८५ इति कृते लब्धिः २३ विंशति गुणः ॥ अथवा स्वतक्षणं भाज्यहारादिकं क्षेपः इष्टगुणो ॥ क
ल्पिता मिमिष्टं २ भाज्यहारौ दृढौ ताभ्यां हतौ जातौ ३४ । २० तष्टयोः षट् कपंचकयोर्योजितौ ४०
३५ । भाज्यं पंचत्रिंशता हते ३५ जातं ७७३५ क्षेपे ६५ क्षिप्ते ७८०० हरेण भक्ते ७८०० लब्धं ४० त्रिचतुः पं ॥ एवं ॥
चेत्यादिना स्वतक्षणगुणयेता लब्धिगुणौ ज्ञेयौ ५७ । ५० इष्टवशादेवमनेकधा लब्धिगुणौ । करणसू

त्रं नवति कुट्टविधिर्युतिभाज्ययोः सम मपवर्त्तितयोरथवा गुणः ॥ भवति यो युतिभाजकयोः पुनः सच
भवेदपवर्त्तनसंगुणः ॥ वा अथवा कुट्टविधिः ॥ कुट्टक विधानं स्याद्युतिभाजयोः क्षेपकभाज्यनीयीक
योः समपवर्त्तितयोः केनाप्यंकेन छिन्नयोरपि गुणो गुणकारांको भवति । तुपुनर्द्वयो गुणोभवति
उदाहरणं ॥ शतं हतं येन युतं नवत्या विवर्जितं वा विहृतं त्रिषष्ट्या ॥ निरग्रकं स्याद्वद मे गुणं तं स्पष्टं
पटीयान्यदि कुट्टकेसि । शतं हतं येन युतं नवत्या युतं नवति सहितं ॥ अथवा विवर्जितं । मपि येन गुणे
न गुणितं त्रिषष्ट्या हृतं त्रिषष्टिविक्तं निरग्रं निरवशेषं स्यात् । मेम मत्तं गुणं गुणांकं वद ब्रूहि । यदि लं कुट्टके वा
कुट्टकविधौ स्पष्टं स्फुटं पटीयान् पटुतरो । न्यास संयुतौ सि । नव सिइतिन्यासः १०० क्षेप ९० परस्परं
भाजितयोरिति: १०० भक्ते लब्धं १ शेषं ३७ अनेन हारस्य भागः ६३ भक्ते लब्धं १ शेषं २६ अनेन भक्ते
३७ लब्धं १ शेषं ११ पुनः २६ भक्ते २६ लब्धं २ शेषं ४ पुनः ११ भक्ते ११ लब्धं २ शेषं ३ पुनर्भक्ते ४ लब्धं १ शेषं १ लब्धं
योदृश्यं ते अधः क्षेपस्तदधः शून्यमिति कृते जाता वल्ली उपांत्येन स्वोर्ध्वे हते अंत्ये योजिते पुनः पुन
रिति कृते जा तौ राशी २४ ३० भाज्यहाराभ्यां पृथक् पृथक् तष्टे ३० । ५३० भक्ते शेषं ३० । १८ इमा मेव ल
ब्धिगुणे अ १ ष्टादशा निर्दिष्टौ । अथवा भाज्यक्षेपौ हदशभिरपव १० त्तितौ १० । २ परस्परं भाजितौ लब्धयस्तदधः ।

शून्यमितिकृतेजातावल्ली १ उपांत्येन स्वोर्ध्वे हतेंत्येयोजितेपुनः शून्यमितिकृतेजातोराशी १८ अत्रलब्धयो
विषमाजाताः तेनलब्धिर्नग्राह्यास्यात् अतोधस्तनांकस्यतक्षणं हरेणानष्टे ७ लब्धं २ शेषं ४५ अयमेवगुणः॥ अ
यागतोलब्धिगुणौविशोध्यौस्वतक्षणादितिवचनात् शोधिते ७ पातितेजातंशेषं २८ आगवगुणाप्रभाज्येक्षे
पयुतेहरभक्तेलब्धिगुणौ ३०।१८ अथवायुतिजातकोनवजिरेपवर्तितो ७० क्षेप १० परस्परंभजनात्जाति
गुणलब्धी ३ क्षेपकशून्येधोन्यकृतेजातवल्ली ५ उपांतिमेनस्वोर्ध्वेहते इतिकृतेजातोराशि ४० अत्रलब्धि
र्नग्राह्या अधस्तनांकस्यस्वतक्षणं ३ नष्टे शेषं २ हरक्षेपापवर्तनं ९ अनेनगुणितोजातः सएवगुणः १८
पूर्ववल्लब्धिः ३० गुणलब्धोः स्वतक्षणक्षेपइतिगुणलब्धीजातो १८।३० अथवाधाराद् तौ २ ४ गुणौ जात्यहारे
जातौ १२४।२०० गुणलब्धोयोजितोजातौलब्धिगुणौ २३०।१४४ इत्यादि। अथवाहारक्षेपौनवभिः पुनः जा
त्यक्षेपौदशभिरपवर्तितौ ५ क्षेप १ परस्परंभजनात्पूर्ववल्ली १ उपांतिमेनस्वोर्ध्वेहतेंत्येयोजितेजा
तौराशि ३ लब्धिर्नग्राह्याधिकएवगुणः हारक्षेपावर्तने २ गुणितेजातः सएव १८ गुणान्नभजनात्यांलब्धि
३० द्वित्रिचतुःपंचादिनिरिष्टांकेःस्वहारोगुणायित्वा गुणलब्धोःप्रक्षिप्य गुणलब्धीसाध्ये। करणसूत्रं॥ ॥२००॥
क्षेपजेतक्षणाच्छुद्धे गुणाप्तीस्तोविशुद्धिजे। येयेक्षेपजेगुणाप्तीतेएवस्वतक्षणाभ्यांशुद्धेवियोगजेभवत

इति। कोर्थः समासुलब्धिगुणाप्तीक्षेपजेभवतः। विषमासुगुणाप्तीशुद्धिजेभवतः। ततोयेक्षेपजेतेएवस्वतक्ष
णाच्छुद्धिजेवियोगजेस्तः। येवियोगजेतेएवस्वतक्षणाच्छुद्धेक्षेपजेभवतः। ततोयेक्षेपजेतेएवस्वतक्षणाच्छु
द्धिजेवियोगजेस्तःशुद्धेक्षेपजेभवतइत्यर्थः। अत्रपूर्वोदाहरणेनवतिक्षेपेयौलब्धिगुणौतौ स्वतक्षणाभ्यामाभ्यां
२००।६३ शोधितौ। येशोधकेतन्मितौलब्धिगुणौनवतिशोधनेस्यातवो। तद्यथा। पूर्वानीतौलब्धिगुणौ ३०।१८
एतौतक्षणाभ्यांशोधितौ १७०।४५ इतिकृतेशोधके ३०।४५ इमौलब्धिगुणौनवतिशोधनेयथा ४५ गुणि
तेजातं ४५०० अतोनवतिशोध्या ४५०० इतिकृतेशेषं ४४१० हारेसाप्तके ४४१० लब्धं ७० इमौविशुद्धिजौ
।एतयोरपिस्वतक्षणक्षेपः ७ः इतिकृते ७०।१८ द्विगुणेक्षेपे ७०।७। एमानत्यं उदाहरणं। यद्गुणग
णकषष्टिरन्विताव्रजिताचदशभिःषडुत्तरैः। स्यात्त्रयोदशहृतानिरग्रकातंगुणंकथयमेपृथक्पृथक्
द्वेगणकगणितकजाकुशलषष्टिः रूपषाष्टिः। यद्गुणा। येनांकेनगुणलक्षणेनगुणितास्ती। षडुत्तरोदशो
भिरन्विता। षोडशक्षेपयुतावसमुच्चये। षोडशभिरेववर्जिताऊनीकृता। त्रयोदशाकृता। त्रयोदशभिर्भक्ता
सतीनिरग्रकानिरवशेषाभवतीति। तंगुणंमेममपृथक्पृथक्वदकथय। आचद्यन्यासः |भाज्य ६० हार १३| क्षेप १६
परस्परंभजनाल्लब्धयःना ४ अधक्षेपः १६ च। इतिकृतेजातावल्ली ४ उपांतिमेनस्वोर्ध्वेहतेइ तिजातो

राशि ३६८ स्वतक्षणं ३६८ । ६९ । हृते शेषके ८ । ९ इतीमौ लब्धिगुणौ । अत्र पिलब्धयो विषमाः । अतइमौ
लब्धिगुणौ स्वतक्षणाभ्यां शोध्यौ ६७ । ३ इतिकृते शेषके ५९ । ११ क्षेपशुद्धेपि इमौ लब्धि ५९ । १८ गुणो यथा
६९ । गुणिते ९९० क्षेपशुद्धे पि ९७९ हारेण भक्ते ६९ । लब्धं ५९ इमे क्षेपजे गुणलब्धी ५९ । १८ भाज्ये गुणिते २० जा
ते १२० अतः क्षेपशुद्धा पातिते शेषं १०४ हारेण भक्ते लब्धं ८ इमे शुद्धिजे । करण सूत्रं गुणलब्ध्योः सम
ग्राह्यं धीमताक्षणे फलं । हरतष्टे धनक्षेपे गुणलब्धी तु पूर्ववत् । क्षेपतक्षणलाभाढ्या लब्धिः शुद्धौ
तु वर्जिता ॥ धीमता चिदुषा तक्षणेत न करेण फलं ग्राह्येन शेषं । समतुल्यं एकमेव । कयोः गुणलब्ध्योः ।
गुणश्च लब्धिश्च गुणलब्धी तयो गुणलब्ध्योः । कोर्थः । वल्लीसमुत्पन्नराशिद्वये । धीराशौ गुणो भवति
अतो धीराशेरेव फलाद्गुणलब्धो भवति स्मस्मान्नदेव ग्राह्यमित्यर्थः । उदाहरणे । येन संगुणिताः ।
पंचत्रयो विंशति संयुताः वर्जिता वा त्रिभिर्भक्ता निरग्राः स्युः हास को गुणः । पंच पंच संख्याका इमा
येन गुणेन गुणिताः त्रयोविंशति युताः । त्रयोविंशति सहिताः । न्यासः । भाः ५ क्षेप २३ परस्पर भजन
जातं २ । अतः क्षेपे एवं च विन्यस्य जाता वल्ली ३ । ३ उपांतिमेन स्वोर्ध्वे हते इत्यादिजातौ राशी ४ । ३ एतौ भाज्यहारा ॥१०२॥
भ्यां तष्टौ ४ । ३ । उर्ध्वराशौ पंचभिस्तष्टमा ० एन वल्लनं तेतत्र तेन ग्राह्यौ गुणलब्धौ । समं ग्राह्यं । अस्मात्

सम लक्षणात् फलात् भाज्ये पंच के पातिते शेषं २ अयं गुणः । अनेन पंचक लक्षणो भाज्यो गुणः । १ गुणिते जातं
१० क्षेप २३ युते ३३ हरेण भक्ते ३ । लब्धं ११ एकत्र गुणलब्धी ५ । ११ क्षेपजे न तक्षण छुद्धी दे इति २ । ३ । अत्र पंच
स्य एकादश न पतंति । अतः एकादशान्यः पंच शोधितः । शेषं ६ दं क्षणगतं जातं । त्रयाणं मध्यात् दो शोधि
तौ शेषं १ एकत्र ॥ ६ । १ इष्टाहतः स्वस्वहरेण युक्ते इति कल्पितमिष्टं २ भाज्यहारो गुणितो जातौ १० । ६ गुणल
ब्ध्यो योजितौ १६ । ७ षट्स्त्रगुणतादशान्यः शोताः । शेषं ४ एकके योजिता जातं एकत्र ७ । ४ अस्याधन लब्धि रिति
संज्ञा । एवं सर्वत्र । अथवा हरतष्टे धनक्षेपे गुणलब्धी तु पूर्ववत् । क्षेपे क्षेपांके हरतष्टे हारभक्ते पूर्ववत् अ
ग्र वत् शुद्धिजे गुणलब्धी भवतः । उदाहरणस्य प्रागुक्तस्य प्रागुक्तस्य न्यासः भा ५ हा ३ क्षेप २३ हरतष्टे क्षेपे ।
२३ । शेषं २ अयं क्षेपः भाज्यहार ३ क्षेप २ परस्पर भजनाज्जाता वल्ली ० । २ उपांतिमेन स्वोर्ध्वे हते जातौ राशी ४
स्वहाराभ्यां शोधिते ५ । ३ । शेषं १ । १ इमे शुद्धिजे क्षेपतक्षणलाभा ० त्या लब्धिः शुद्धौ तु वर्जिता लब्धिः
क्षेपतक्षणलाभाढ्या क्षेपस्य तक्षणं क्षेपतक्षणं तत्र लाभेन पूर्वोक्तक्षण फलेन आढ्या युक्ता कार्ये
त्यर्थः । शुद्धौ तु वर्जिता हीनेत्यर्थः भा ५ हा ३ क्षेप २३ तक्षणे लब्धं ७ अत्र गुणलब्धी ५ । ४ । लब्धिर्लाभाढ्या ७ इतिकृ
ते ११ इमे क्षेपजे ५ । १० शुद्धौ तु स्वतक्षणाच्छोधिते ५ । ३ इति क्षणगता लब्धिः जाता गुणलब्धी ५ । ६ । धनलब्ध

र्थे द्विगुणस्वहारो १०९ । द्वि द्वौ जाते गुणाप्ती ७।४ । करणसूत्रं । क्षेपाभावे तथा यत्र क्षेपः शुध्येद्धरोद्धृ
तः । ज्ञेयः शून्यं गुणस्तत्र क्षेपो हारहृतः फलं । क्षेपस्य अभावः अभावः तस्मिन् क्षेपाभावे
११ हारभाज्यावेव गुणाप्ती स्तः । तथा तेन प्रकारेण क्षेपः हरेण धृतो हारभक्तः सन् शुध्येत् । निरवशेषो
भवति । तत्र शून्यं गुणो स्यात् । हारहृतो हारभक्तः क्षेपः फलं स्यादिति । कोर्थः । क्षेपभजनाद्यत्
लब्धं फलं सा लब्धिरित्यर्थः । उदाहरणं । येन पंचगुणिताः खयुताः पंचषष्टिसहिताश्च ते यवा ॥
स्युस्त्रयोदशहृता निरग्रकास्तं गुणं गणक कीर्तयाशु मे । हे गणक पंच येन गुणेन गुणि
ताः खसंयुताः शून्यसहितास्त्रयोदशहृतास्त्रयोदशभिर्भक्ता निरग्रकाः स्युर्निःशेषा भवंति । अथवा
पंचषष्टिसहिताः पंचषष्टियुताः तं गुणं आशु शीघ्रं मम कथय कीर्तय । न्यासः । भा ५ हा १३ क्षे ० परस्प
रभजनाज्जाता वल्ली ० २ ० उपांतिमेनेत्यादिना जातो राशिः ० ० स्वतक्षणं ० ० एतदेव गुणाप्ती ॥
०।० । द्वितीयोदाहरणस्य न्यासः । भा ५ हा १३ क्षेपः ६५ क्षेपः शुध्येद्धरोद्धृतः । ६५ १३ भक्ते
लब्धं पंच शेषं ० इदं शून्यं ० गुणाः । लब्धिः पूर्ववत् एक त्रात् इमे गुणाप्ती वा ०।५ । इत्यादि । सर्वकु ॥१०२॥
ट्टके गुणलब्ध्योरानंत्यार्थं सूत्रं । इष्टाहतस्वस्वहरेण युक्ते ते वा भवेतां बहुधा गुणाप्ती । अस्य व्या

सिः सर्वोदाहरणे बुद्धिमता स्त्र पूर्वमेवाथ स्थिरकुट्टकः । क्षेपे तु रूपे यदि वा विशुद्धे स्यातां क्रमा
द्ये गुणकारलब्धी अभीप्सितक्षेपविशुद्धिनिघ्ने स्वहारतष्टे भवतस्तयोस्ते । रूपे एकलक्षणे क्षेपे
सति यदि वा पक्षांतरे योतने विशुद्धौ सत्यां रूपविशोधने कृते सति क्रमादनुक्रमेण ये गुणका
रलब्धी स्यातां भवतः । कथंभूते । अभीप्सितक्षेपविशुद्धिनिघ्ने । क्षेपश्च विशुद्धिश्च क्षेप० विशुद्धी
अभीप्सितस्य इष्टांकस्य क्षेपविशुद्धी । अभीप्सितक्षेपविशुद्धी ताभ्यां निघ्ने । क्षेपश्च विहते । अभी
प्सितक्षेपविशुद्धिनिघ्ने । पुनः किं स्वहारतष्टे । निजनिजच्छेदविभक्ते । तयोः पूर्वोक्तयोर्हरभाज्य
हारयोस्ते गुणकारलब्धी स्यातां । प्रथमोदाहरणे हरभाज्यहरयोः रूपक्षेपयोर्न्यासः भा १७ हा १५ क्षेपः
परस्परभजनाज्जाता वल्ली ० तदधः क्षेपस्तदधः शून्यं ० उपांतिमेन स्वोर्ध्वे हते इत्यादि नाजा
तो राशी इमौ लब्धी गुणौ तद्यथा हते जाते क्षेपे रू० प्रक्षिते पाजातं १२० हारतष्टे १२० भक्ते ल
ब्धं ८ अथ इष्टं कल्पितं गुण ५ गुणाप्ती ७।८ पंचकेन हते ३५।४० स्वहारतष्टे ४० भक्ते
शेषं ५।१६ इमे गुणाप्ती यथा हते ८५ क्षेपे पंचके क्षिते जातं । ९० हारतष्टे ९० भक्ते लब्धं ६ अ
थवा इष्ट ७ गुणाप्ती हते जाते ४९।५६ । स्वहारतष्टे ५१ । शेष ४।५ ५ इमे गुणलब्धी

वा॰चं॰

विरेमानेत्यं॥ अथ रूपशुद्धौ न्यासः॥ ३१॥ क्षेपः २॥ अग्रज्जाते गुणासौ ३।८ स्वनक्षत्रग्णस्यां शोधिते ७१।७५। यातिते जाते ९।८। इमौ लब्धिगुणौ यथा ८। हते जातं ७९ रूपे शोधिते जातं ७५ हरेणाप्ते ७५ लब्धं ९ एते गुणासौ इ ष्ट क्षेप निघ्ने २ १३ अनेन निघ्ने १२ गुणिते जाते ५५१ ९३। स्वहारतष्टे ५५१ ९३ शेषं ११२ इमे गुणासौ यथा ७ हते जाते ७७ क्षेपसमके शोधिते ८०। हरेणाप्ते ८० लब्धं १२ एवं सर्वत्रानंत्यं। अस्य ग्रहगणितविषये उपयोगः॥ अथ तदर्थं किंचिदुच्यते। कल्पाधशुद्धिविकलावशेषं षष्टिश्च भाज्यः कुदिनानि हारः॥ तज्जं फ लस्तुर्विकलागुणस्तु लिप्ताग्रमस्मात् कलालवाग्रं॥ एवं दैतेर्द्वं च तथाधिमासावमाग्रकाभ्यां दिवसा रवींदो॥ ग्रहस्य विकलावशेषात् ग्रहाहर्गणयोरानयनं। तथात्र षष्टिर्भाज्यः॥ कुदिनानि हारः॥ विकलाशेषं शुद्धिरिति। प्रकल्प्य साध्ये गुणाप्ती। तत्र लब्धिप्रमिता विकलास्तु गुणमितं कलाशेषं। एवं कलाशेषा त् लब्धिः कलाः गुणो भागशेषं शुद्धिः॥ कुदिनानि हारः॥ त्रिंशद्भाज्य लब्धिर्भागाः॥ गुणो राशिशेषं॥ द्वा दश भाज्यः॥ कुदिनानि हारः॥ राशिशेषं शुद्धिः॥ फलं राशयः॥ गुणो॥ हर्गणः शेषं कल्पाभगणो भाज्यः॥ कुदिनानि हारः॥ भगणशेषं शुद्धिः। फलं गतभगणाः॥ गुणो॥ हर्गणः स्यादिति। अस्योदाहरणानि ॥१०३॥ प्रश्नाध्याये। एकल्पाधिमासा भाज्यः॥ रविदिनानि हारः॥ अधिमासशेषं शुद्धिः। लब्धा गताधिमासाः॥ गुणे

गतरविदिवसाः॥ आचार्येणापि सिद्धांते प्रश्नाध्याये स्योदाहरणानि दत्तानि। अस्माभिरप्यत्रानुपयो गित्वाद्ग्रंथप्रपंचभीत्या नोदाहृतानि। करणसूत्रं। एको हरश्चेद्गुणको विभिन्नौ तदा गुणैक्यं परिकल्प्य भाज्यं। अग्रैक्यमग्रं कृत उक्तवद्यः संश्लिष्टसंज्ञः स्फुटकुट्टकोसौ॥ विदितहरच्छेदएको भवति गुणकौ गुणकारौ कौतु पुनः भिन्नौ पृथक् भूतौ भवतः। तदाभाज्यं जनीयं कं गुणैक्यं गुणयोरैक्यं गुणैक्यं॥ परि कल्प्य प्रतिष्ठाप्य। अग्रैक्यं श्लिष्टेग्रे क्षेपस्थाने शुद्धिसंज्ञापरिकल्प्य। यः संश्लिष्टसंज्ञः कुट्टक उक्तः॥ पूर्ववि धिकृतः विहितः॥ असौ स्फुटकुट्टकः॥ अग्रे क्षेपस्थाने शुद्धिसंज्ञापरिकल्प्य॥ यः संश्लिष्टसंज्ञः कुट्टक उक्तः पूर्वविधिकृतः विहित॥ असौ स्फुटकुट्टकः स्यादिति। उदाहरणं। कः पंचनिघ्नो विहृतस्त्रिषष्ट्या सप्ताव शेषोथ स एव राशिः दिग्भाहतः स्याद्विहृतस्त्रिषष्ट्या चतुर्दशाग्रो वद राशिमेवं नं। को राशिः पंचनिघ्नः पं च निर्गुणितः। त्रिषष्ट्या विहृतो भक्तः सन् सप्तावशेषः स्यात्सप्ताग्रको भवति। स एव राशिर्दशाहतो दश भिर्गुणितः त्रिषष्ट्या विहृतो भक्तः सन् चतुर्दशाग्रको भवति। चतुर्दशावशेषः स्यात् हे गणका एनं रा शिं वद ब्रूहि अत्र गुणैक्यं। एको गुणः पंच ५ अपरो दश १० एक्यं १५ अयं भाज्यः। त्रिषष्टिर्हरः। अग्रैक्यं क्षेपः सप्त ७ अपरश्चतुर्दश १४ ऐक्यं २१ अयं क्षेपः विशुद्धिसंज्ञः इति न्यासः भाज्य १५ हर ६३ क्षेप २१ भवति कुट्टविधि

युति नाम्नयोरिति युतिनाम्नौ त्रिभिरपवर्त्तितौ जातौ भाज्य ४ क्षेप ७ मिथो भजनाज्जाता वल्ली ३ उपां
तिमेन स्वोर्द्ध हते इत्यादिना जातौ राशी २५ अत्र चतुर्द ... नेनाप्ता उर्द्धांके हरतष्टे शेषं ५ ४९ अ
यं क्षेपजो गुणः १ अनेन भाज्ये गुणिते क्षेपे क्षिप्ते राशि निरवशेषो भवति अत्र समावशेषः १ अ तद
यं विशुद्धिजः क्षेपजे तक्षणाच्छुद्धे इति वचनात् अस्मिन् त्रिषष्टेः शोधि ६३ शेष २४ अयं विशुद्धिजो
गुणः अनेन भाज्यो गुण्यः ५ गुणिते जातं ७० हरभक्ते ६३ शेषं १ अथ दशाहते ६ जातं १४० हरभक्ते
२४० शेषं २४॥ ॥इति श्रीहेमकररत्नीमदेवात्मजमोषदेवविरचितायां लीलावती विवृत्तौ कुट्टका
ध्यायः समाप्तः॥ ॥अथ गणितपाशे निर्दिष्टांकैः संख्याकरणमत्रं स्थानांत्रमेकादिचयांकघातः संख्या
विभेदा नियतैः स्फुरंकैः भक्तोंकमित्यंकसमाससनिघ्नः स्थानेषु युक्तो मिति संयुतिस्यात् एकादिचयांक
घातः एक आदौ च चये च एकादिचयः एकादिचयेन येंका एकादिचयांकास्तेषां घातो हननं एकादिचयां
कघातः नितैरंके निर्दिष्टांकैः संख्याविभेदाः स्युः मितिप्रभेदा भवंति स्थानांतं यावत् एकादित्र्यादि
स्थानपर्यंतं कोर्थः यष्टुर्यावंत्यंकस्थानानि तावंतोंका एकादिचयेन स्थापयित्वा परस्परं गुणनीया इत्यर्थः ॥१०४॥
किंवि एकादिचयांकघातः अंकसमाससनिघ्नः अंकानां निर्दिष्टांकानां समासो मीलनं अंकसमासस्तेन

निघ्नो हतोंकसमाससनिघ्नः अंकमित्या भक्तः यवंत्यंकस्थानानि तावद्भिर्भक्तः स्थानेषु युक्तः एकादिदशा
दिस्थानेषु युक्तो मीलितः सन् मिति संयुतिः स्यात् मितीनां संख्याभेदानां संयुतिः सम्यग्योगो भवं तित
संख्यकेका निपृथग्वदाशु द्विकाष्टकानां द्वौ च अष्टकश्च द्विकाष्टकौ ताभ्यां द्विकाष्टकाभ्यां आभ्यां निर्दि
ष्टांकाभ्यां कति संख्याविभेदाः स्युः कियंतो मितयो भवंति वा सुमुच्चये त्रिनवाष्टकैः त्रयश्च नव च अ
ष्टश्च त्रिनवाष्टकास्तैस्त्रिनवाष्टकैः एभिर्निरुद्दिष्टांकैः कति संख्याविभेदाः स्युः निरंतरं अंतरं विना द्या
दिनवावसानैर्वा द्वौ आदिर्येषां ते द्यादयः नव अवसाने अंते येषां ते नवावसानाः द्यादयश्च नवावसा
नाश्च द्यादिनवावसानाः ते द्यादिनवावसानैः एभिरष्टभिर्नियतैरंकैः कति संख्याविभेदाः स्युः कियंत्यो
मितयः संभवंति हे गणक तत्संख्यैक्यानि तेषां संख्याभेदानां ऐक्यानि योगः पृथक् पृथक् आशु शीघ्रं
वद कथय न्यासः २८ अत्र स्थाने २ अत्र स्थानांतमेकादिचयांकाः १।२ घातः एकेन गुणितं तदेवेति
न्यायात् २ एवं जातौ संख्याभेदौ संख्यैक्यानयने २ अंकस्य समाससनिघ्नः अंकसमासे १० अनेन
निघ्नः २० हते जातं २० अंकस्थानमितिः २ आभ्यां भक्तः १० लब्धं १० स्थानद्वये एकादिदशादिस्थान
द्वये युक्तो मीलितः ११० जातं ११० अयं स्थानद्वयस्य प्रस्तारोत्पन्नभेदयोर्दर्शनं ८२ एकत्र योजिते ११०

द्वितीयोदाहरणे न्यासः॥३।९।८।अत्र स्थानानि त्रीणि स्थानांतमेकादिचयांकाः॥१।२।३। घातः ६ एतावंत संख्या भेदाः॥ संख्यैक्यानयनं॥ उद्दिष्टांकसमासः॥२० अनेन घातो निहतः १२० जातं १२० अंकमित्या त्रिनिभक्तः (३) स्थान —ये युक्तो जातं ४०० एकत्र ४४४० एषां भेदानां प्रस्तारदर्शनं ३९८ अंकयोजना जातं ४४४० तृतीयोदाहरणे न्यासः ॥२।३।४।५।६।७।८।९ अत्र स्थानान्यष्टौ॥ ए ३८९ / ८३९ कादिचयांकाः॥१।२।३।४।५।६।७।८ एषां घातः ४०३२० एतावंतः संख्या भेदाः॥ संख्यैक्यानयनं॥ उद्दिष्टांकसमासः ४४ अनेन घातो गुणितः ४४ / ४०३२० जातं १७७४०८० स्थानांकमित्या ष्टनिर्भागः १७७४०८० लब्धं २२८ ... ७६० ईदृशानि दश आदीन्यन्या निसप्तस्थानानि २२७६० अंकयोः संख्याविंजनाज्जातं २४६३९९९७५३६० अंकबाहुल्यात् ग्रंथप्रपंच भीत्या प्रस्तारो न २२७६०० / २२७६००० दर्शितः २२७६० प्राग्वत् त्रिनवाष्टकवत् तत्र मितिज्ञातव्या॥ उदाहरणं॥ पाशांकुशाहिडमरुकपाल २२७६०००० २२७६०० / २२७६००० पालशूलैः खड्गाशक्तिचारचापयुतैर्भवंति॥ अन्योन्यहस्तकलितैः कति २२७६००००० / २२७६०००००० मूर्ति २२७६०००० भेदाः शंभोर्हरेरिव गदारिसरोजशंखैः॥ शंभोः श्रीमहादेवस्य कति मू २२७६०००००००० २२७६००००० / २२७६०००००० त्रिभेदाः भवंति के ते पाशांक ॥१०५॥
शाहिडमरुकपालशूलैः॥ पाशश्च २२७६००००००००० २२७६०००००००० अंकुशश्च अहिश्च डमरुकं च / २२७६००००००००००

कपालं च शूलं च पाशांकुशाहिडमरुककपालशूलानि तैः॥ पाशांकुशाहिडमरुककपालशूलैः॥ किंविशिष्टैः खड्गाशक्तिचारचापयुतैः॥ खड्गश्च अदश्च शक्तिश्च शरश्च चापश्च खड्गाशक्तिशरचापानि तैर्युतैः खड्गाशक्तिशरचापयुतैः॥ अन्योन्यहस्तकलितैः॥ अन्यश्च अन्यश्च अन्योन्ये अन्योन्ये च तौ हस्तौ च अन्योन्यहस्तास्तेषु कलितानि स्थितानि तैः अन्योन्यहस्तकलितैः॥ कस्येव हरेरिव यथा हरेः श्रीवासुदेवस्य गदारिसरोजशंखैः कौमोदकी चक्र कमल कंबु निर्यथा चतुर्विंशति भेदास्ते वंति तथा शंभोः तेरायुधधार्यैश्च भेदाः कति भवंति तद्वदकथय॥ पाशा संन्यायुधानि दश १० स्थानांतमेकादिचयांकाः॥१२३४५६७८९१०॥ घातः ३६२८८०० एतावंत एव जाता मूर्त्तिभेदाः॥ संख्यैक्यानयनं॥ एषामेवदशानां अंकानां समासे ५५ अनेन घातो निघ्नः ५५ / ३६२८८०० जातं॥ १९९५८४०००॥ स्थानदशकत्वाद्दशनिर्भक्ते जातं — — ५८४००इय मेकस्थानके मीलितांकसं — रव्याः अन्यानि दशादीनि नव स्थानानि अंकबाहुल्यात् प्रस्तारदर्शयितुं न शक्यते। स्थानानि लिखित्वा संख्यादर्शनं १९९५८४०० अंकयोजनाज्जातं २२७५१९९९९७७८२४०० / १९९५८४००० अथहरेश्च अत्रायुधानि ४ स्थानांतमेकादिचयांकाः॥ १९९५८४००००० १२३४ एषां घातः॥२४॥ एते मूर्त्तिभेदाः संख्यैक्यानयनं॥ अंकसमासः १० अनेन घाते हते १९९५८४०००००० जातं २४० स्थानचतुष्टयत्वाच्चतुर्नि
१९९५८४००००००००
१९९५८४०००००००००
१९९५८४००००००००००
१९९५८४०००००००००००
१९९५८४००००००००००००

ला॰टीका

न्नके २४० लब्धं ९० दशादिस्थानानि विलिख्यत ९०० अंकयोजनाजातं ९९९९० एतत्संख्यैक्यं॥ द्वितीयो युध
भेदेन। अंकरूपेण चतुर्विंशतिर्भेदाः॥ गदारि ९०००० सरोजशंखैः इत्यंते॥ गाच। पाशं। १ चग। पाचंशं
२ गपचशं ३ पचाचशं ४ चपगशं ५ पंचगशं ६ गचशंप ७ चगशंप ८ गंशंचप ९ शंगचप १० चपशंग ११ शं
चगप १२ गपशंच १३ पगशंच १४ गशंचप १५ शंचापच १६ पशंगच १७ शंपगच १८ चपशंग १९ पंचशंग २०
चशंपग २१ शंचुपग २२ पशंचग २३ शंपचग २४ इति चतुर्विंशतिर्भेदाः॥ मूर्त्तयः॥ अंकरूपेण यथा १२३४
२१३४।१३२४।३१२४।२३१४।३२१४।१२४३।२१४३।१४२३।४१२३।२४१३।४२१३।१३४२।३१४२।१४३२।४१३२।३४१२।४३१२।
२३४१।३२४१।२४३१।४२३१।३४२१।४३२१। इति चतुर्विंशतिर्भेदा अंकतः॥ विशेषे करणसूत्रं। यावत्स्थानेषु तुल्यांका
स्तैर्भेदैस्तु पृथक्कृतैः॥ प्राग्भेदा विहृता भाज्यास्तत्संख्यैक्यं तु पूर्ववत्। तुल्यांकाः सदृशांका यावत्सु स्था
नेषु भवंति तत्तद्भेदैस्तेषां सदृशांकानां भेदैर्मितिभिः पृथक्कृतैर्विभिन्नैः कृतैः प्राग्भेदा एकादिच
यांकघातोत्पन्ना भेदा विहृता भक्ताः संतो भेदाः संख्याभेदा भवंति। तत्संख्यैक्यं च पूर्ववत्। अंकसमा
सति भेत्यादिना आनेतव्यं। उदाहरणं। द्विघ्येकभूपरिमितैः कति संख्यकाः स्युस्तासां युतिं च गणका ॥१०६॥
शुमम प्रचक्ष्व। अंभोधिकुंभिशरभूतशरैस्तथांकैश्चेदंकपाशकवियुक्तिविशारदोसि॥ दोच दोचएक

अत्रोच्यते द्विघ्येकत्वं द्विघ्येकभूमिः परिमितैस्तुल्यैरंकैः कति संख्यकाः स्युः कियंत्यो मितयो भवं
ति। हे गणक तासां मितीनां योगं मम आशु शीघ्रं प्रचक्ष्व कथय। तथा तेन प्रकारेण अंभोधिकुंभिशरभू
तशरैः चतुरष्टपंचपंचभिरंकैः कति संख्याभेदा भवंति। उदाहरणं। षट्स्थानस्थितैरंकैरन्यान्यैः खे
न विवर्जितैः॥ कति संख्या विभेदाः स्युर्यदि वेत्सि निगद्यतां॥ षट्स्थानकस्थितैः स्थानषट्कगतैः रंकैः॥
अन्यान्यैः अन्ये च अन्ये च अन्यान्ये तैरन्यान्यैः॥ असदृशैरित्यर्थः। खेन वर्जितैः शून्येन विरहितैः॥
कति संख्या विभेदाः स्युरिति कियंत्यो मितयो भवंति हे गणक यदि वेत्सि जानासि। तयोर्निगद्यतां
कथ्यतां॥ तद्दर्शनं अत्रांतिमांके [illegible] अयं स्थानकस्थानषट्कं यावत् गणकाय चितोनंस्तः। १।२।[illegible]
[illegible] भेदाः [illegible] अनियतत्वात् लभ्यते [illegible] नवानां मेकानां सह
कृत्य [illegible] चतुराशीतिः [illegible] इत्यनेन [illegible]
[illegible] संयोगैः [illegible] १२३४ [illegible]
[illegible] १२३४ [illegible] १२३४ [illegible]
[illegible] २३४ [illegible]
२ २

टीका

विंशतिभेदानवंतितयावांतो। तेराद्युधेर्थायैश्चभेदाः कतिभवंतितद्दकथय। पाशांकुशाद्यायुधा। निदशा१० स्थानांतमेकादिचयांका। १२३४५६७८९१०। घातः ३६२८८०० एतावंतएवजाता मूर्तिभेदाः॥ संख्यैक्यानयनं। एषामेवदशानामंकानांसमासे ५५ अनेनघातोनिघ्नः ५५ जातं। १९९५८४०००। स्थानदशाकत्वाद्भिन्नस्के जातं १९ ५८४०० इयमेकस्थानकेमीलितांकसंख्या ३६२८८००। अन्यानिदशाहीनिनवस्थानानि अंकबाहुल्यात्प्रस्तारदर्शयितुनशक्य) इदमाधेऽकं नवंचनीयं॥

॥१०७॥

७८।१८।१२३६७८।१९।१२४६७८।२०।१३४५७८।२१।१३४६७८।२२।१२५६७८।२३।१३५६७८।२४।१३५६७८।२५।१२४५६

७८।२६।१४५६७८।२७।१३४५६७८।२८।१२३४५९।२९।१२३४५९।३०।१२३५६९।३१।१२४५६९।३२।१३४५६

६९।३३।१३४५६९।३४।१२३४७९।३५।१२३५७९।३६।१२४५७९।३७।१३४५७९।३८।१२३४५८९।३९।१२३६

७९।४०।१२४६७९।४१।१३४६७९।४२।१२३४६७९।४३।११५६७९।४४।१३५६७९।४५।१२३५६७९।४६।१४५६७९।४७।१२४५६७९

४८।१३४५६७९।४९।१२३४८९।५०।१२३५८९।५१।१२४५८९।५२।१३४५८९।५३।१२३४५८९।५४।१२३६८९।५५।१२४६८

९।५६॥ ।सिध्यतियथा १२ ११ १० ९ ८ ७ ६ ५ ४ ३ २ १
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ परःपूर्वेणसंगुणपतत्परस्तत्परेणचो

तिस्ततेजाता। गा७ रूपाद्याः। १।१२।६६।२२०।४९५।७९२।९२४।७९२।४९५।२२०।६६।१२।१। अत्रस्थानकपं

चदशायांनवातितासंख्या। अत्रनवानांभगाः ४९। अथप्रस्तारदर्शनं। तावत्एकस्यप्रस्तारे एक

एवाहयीयैनिदो। यथा १ २ त्रिकस्यभेदभेदचतुष्टयं १ २ चतुष्टकस्यभेदाष्टकंयथा। ४

पंचकस्य ५ एतएवषोडशभेदाएकांकादिस्था १ २ भेदद्वयंतेयथामेरौ। एवं १९

व्यक्तिः एकंएककांकषट्कानि४। १२।१३। २३। इतिचत्वारि। अंकानि

१।३।१३ १३१।१२१।२१२।१२२षट्चतुरंकाति ।१२।११२१।१२।११।२११। इति

१०८॥

चत्वारि। पंचकमेकमेव ११११ इति। एवमन्येपि ज्ञातव्याः॥ अन्यच्च॥ यथा स्थानकत्रये समसकसंख्यैर्भेदाः तथा

हि। स्थानकत्रये भेदाः षट् यथा १२४ ११५ अत्र भेदत्रयं ११५ २२३ अत्रापि त्रयं २३३ सर्वे मिलिताः जा

ताः भेदाः १५। स्थानपंचकेत्र योदशाप्त त्रो संख्याभेदाः १२ ५११ ३४३ अत्र भेदाः २२३ ९०१२३५२ अत्रापि

॥ ९०१२३६५ अत्रापि ९०एषु सर्वे षुउदाहरणेषु यावत्स्थाने तुल्यांका इत्यनेन सूत्रेण भेदा

नानीय प्रत्ययः कार्यः॥ यथा १२ ४३ अत्र स्थान ५ एकादिच यांकाः ११२३४५ घातः १२० अत्र द्वे स्थाने त्रिक

लक्षणे तुल्ये तयोर्यतो भेदो २ स्तेनाप्तेनकः ११२० लब्धं ६० एवं पंचकदा एवमन्येप्यूह्याः॥ न गुणे

न हरो न कृतिर्घनः पृष्टस्तथापि दुष्टानां गविंतगुणकबहूनां स्यातोऽवश्यमंकपातोस्मिन्॥ गुणे गुणकां

कोन पृष्टः। हरो भागहारो न पृष्टः। कृतिर्वर्गो न पृष्टः। न धनः पृष्टः॥ तथापि इत्यपि सतिदुष्टानां परप्रकर्षा

सहिष्णूनां गर्वितगणकबहूनां वयमन्यानां अवश्यं निश्चितं अस्मिन् यातः स्यात् पतनं भवति। मोहो

त्पद्यत इत्यर्थः॥ येषां सज्जातिगुणवर्गविभूषितांगी शुद्धाखिलव्यवहृतिः खलु कंठसक्ता। लीलावती

इह सरसोक्तिमुदाहरंती तेषां सदैव सुखसंपदुपैति वृद्धिं॥ छा॥ इहजगति येषां मनुष्याणां प्रतियोगत्वाज्जा

मुपमवतां लीलावतीगणकोत्तसज्जास्फारोपस्तं ग्रंथविशेषं लीलावक्रतीनाश्रीगणिपाटीकामिनीचंड

नयत्रसहेतुकानि विषणानि। सज्जातिनिश्चतसृजि योगगुणवर्गौ तत्र गुणे गुणाकारः॥ इष्टांकस्पर्शांकेन ॥१०८॥

गुणनं। वर्गश्च सम द्विघातः तास्यां विभूषितानि संहर्णि तयालाबोजिता निअंगानि परिकर्माणि यस्यां सा

वहृति॥ शुद्धानि दोषापरिवर्जिताः संपूर्णा व्यवहृतयो व्यवहारा मिश्रकादयो यस्यां सा। तथा सर

सोक्तिः। सरसा अक्लिष्टा जटिलत्यर्थविकत्वेनश्रोतृणां हृदयंगमा या उक्तिः ग्रंथभणिति स्तां उदा

हरंती॥ व्यंजयंती॥ खलु निश्चितं कंठसक्ता स्वभ्यासात् या कंठवर्तिनी कृता। तेषां पुरुषाणां

सुखसंपत॥ गणितस्कंधपरिज्ञानेन समाधानरूपं यत्सुखं तस्य संपत उत्कर्षो वृद्धिः वृ

द्धिमुपैति गच्छति॥ अपच कामिनी पक्षे लीलावती। वाग्वेषचेष्टितैः प्रियस्यानुरंजनकृ

तिर्लीलेति वचनात्॥ लीला स्त्रीणां स्वाभाविको लंकारविशेषः साविद्यते यस्याः

सा लीलावती॥ उत्तमनायिका सज्जातिगुणवर्गविभूषितांगी॥ सहजा त्यागकृति

यादिकयायोगुणवर्ग दया। हि एप लज्जा मर्यादादि गुणवर्गसमूहस्तेन विभूषिता

नि तेनकृतमंगं वपुर्यस्याः सा तथा। शुद्धाखिलव्यवहृतिः॥ अपस्तु कामुपागते गृह

पतौ मुषणेन मता तस्या हार्धि तदृष्टि ससमनविधि स्तस्योपचा स्वयं। सुप्ते तत्र

यीतत सुप्तमतो न हि स्वशय्यां स्वयं आचैः पुत्रानि वेदिता कुलवधूरसि द्धांत धर्मा इमे। इत्येवं

व्यवहारेण व्यवहाररूपं यास्याः सा तथा॥ सरसोक्तिमुदाहरंती। सरसा संभोगारा

यो उक्ति वचनं तामुदाहरं तिजल्पंति सती कंठे सक्ता निरंतरं दाहजिंगन वक्षोन

कंठजग्ना। तेषां सदा सर्वस्मिन् काले सुखं संपत् काम जरेणि ख्याति प्रायो वृद्धिं प्रा

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

टीका

कं जैमुपैति॥ छ॥ इति श्री सिद्धांतशिरोमणौ भास्करीये लीलावती इत्यभिधाना तस्याटी
का स्वर्णकार नीमदेवसुत मोषदेवकाना लीलावती पाटी गणितपाटी टीका
समाप्ती॥ संवत् १८०२ वर्षे शाके १६६७ प्रवर्तमाने फाल्गुण नपसि मासे सितेत
रे पक्षे ३ गुरुवासरे दैवज्ञातीय लो श्री श्री मंगलजी सुत नंदराम शंकर लखीतं॥ श्री॥
इदं पुस्तकं सतीपुराज्ञातीय ज्योतिर्विदावटंक श्री ७ धनजी सुत नीलकंठात्मजेन स्वपठनार्थं मिथश्च गोपाल ना ५
स्वायुबोधुबोधित्वाद्द्रस्य करिकलत्रकृताग्रिनष्टपत्रत्वाच्च पुस्तकं विद्याव्यसनी नादेयं खलानामप
रिचितानामविरावासिनां द्वेषीनां न देयं च विद्यापितह्दित्वाद्दिसमालोच्य परार्थं च राजनगरस्मे
धे ऋतिसंख्याके स्वेन लिखितं ऋतिसंख्याके स्वमित्रजनैश्च लिखितमस्ति॥ ज्ञानाज्ञानेन व्यक्ताव्यक्त
स्वरूपोद्दृष्टानां देहे श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री हरिर्जयत्यनितरं धरित्र्यां॥ शुभम्॥

No-99

॥१०९॥